ग्रंथ क्र. २०७६३ — धर्मशास्त्रम्

नाम याज्ञवल्क्यस्मृतिः — ग्रन्थकार

पत्र सं० ५९ गणनया.

श्लोक सं० — अक्षर सं० (पंक्तौ) ३४ — पंक्ति सं० (पृष्ठे) ८

आकार: १०.१" × ३.८". — लिपि: दे.ना. — आधार: का.

१-३ अध्यायाः।

13931

वि० विवरणम् अपू०

पी० एस० यू० पी०—७६ एस० पी० ई०—१९५९—५०,००० — न. ६३६५.

Indira Gandhi National
Centre for the Arts

नं ३३

Indira Gandhi National Centre for the Arts

१

-यमजः पुनात्युभयतस्त्रींस्त्रीन्। इत्युक्त्वा चरतां धर्म्मं सह या दीयतेऽर्थिने। सकायः पावयेत्तज्जः
:षट् षड्वंश्यान् सहात्मना ॥१०॥ आसुरो द्रविणादानाद्गांधर्वः समयान्मिथः। राक्षसो यु
द्धहरणात्पैशाचः कन्याकाछलात् ॥११॥ चत्वारो ब्राह्मणस्याद्याः शस्ता गांधर्वरा
क्षसौ। राज्ञस्तथासुरो वैश्ये शूद्रे चान्यस्तु गर्हितः ॥ पाणिग्राह्यः सवर्णासु गृह्णीया श्रीः ५
त्क्षत्रिया शरं ॥ वैश्या प्रतोदमादद्याद्वेदने चाग्रजन्मनः ॥१३॥ पिता पितामहो भ्रा
ता सकुल्यो जननी तथा। कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥१४॥ अप्रयच्छन्
माप्नोति भ्रूणहत्यामृतावृतौ। गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरं ॥१५॥ सकृत्प्र

वेत्। यत्रानुकूल्यं दंपत्योस्त्रिवर्गस्तत्र वर्द्धते ॥२५॥ मृते जीवति वा पत्यौ या नान्यमुपगच्छति
। सेह कीर्त्तिमवाप्नोति मोदते चोमया सह ॥२६॥ आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीं
॥ त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः ॥२७॥ स्त्रीभिर्भर्तृवचः कार्य्यमेष धर्मः
परस्त्रियः ॥ आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः ॥२८॥ लोकानन्त्यं दिवः प्रा
प्तिः पुत्रप्रपौत्रकैः ॥ यस्मात्तस्मात्स्त्रियः सेव्याश्च सुरक्षिता ॥२९॥ षोडशर्त्तुनिशाः स्त्री
णां तासु युग्मासु सेविता। ब्रह्मचार्येव पर्वण्याद्याश्चतस्रश्च वर्जयेत्। सुस्थ इंदौ
सकृत्पुत्रं लक्षण्यं जनयेत्पुमान् ॥३१॥ यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्। स्व

Indira Gandhi National
Centre for the Arts

२

दारानिरतस्यैव क्षत्रिय्कायतः स्मृताः ॥३२॥ नर्टं त्राट्पि दत्तातिथ्य शूद्रदेवरैः॥ बंधुनि

स्थ स्त्रयः पूज्या नृपराणाद् नाशने ॥३३॥ संयतोपस्करादस्माह घ्राव्यप्रपराजमु

स्य स्त्रयः पूज्यान्नृपराणाद नाशने ॥ कुर्याच्छ सुरयोपादवदनं नर्ट तत्पराः ॥३४॥ नीतांचावीरं सं काव समाजोत्स

स्त्री ॥ कुर्याच्छ सुरयोपादवदनं नर्टे तत्परा ॥३४॥

वदर्शनं। हास्यपरगृहेयानंत्यजे प्रोषितभर्तृका ॥३५॥ रक्षेत्कन्यां पिता विनाप

तिः पुत्रास्य वार्द्धके। अभावे ज्ञातयस्तेषां स्वातंत्र्यं क्वचित्स्त्रियः ॥३६॥ पितृमा

दसुतभ्रातृश्वश्रूश्वशुरदेवरैः। हीनाऽनस्याद्विजा भर्त्ता गर्हणीयान्यथा भवेत् ॥३७॥

पति प्रियहिते युक्ता स्वाचारा विजितेंद्रिया। इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमां गतिं ॥३८॥

क्ता

सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् ॥ सविनासु विधौ धर्म्ये ज्येष्ठया न विनेतरा ॥३९॥

दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः॥ आहरेद्विधिवद्दारानग्नींश्चैवा

विलंबयन् ॥४०॥ इति विवाहप्रकरणं॥ सवर्णेभ्यः सवर्णासु जायते हि सजातयः॥ अनि

विवाहिषु पुत्राः संतानवर्द्धनाः ॥१॥ विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशः स्त्रियां। अं

बष्ठः शूद्र्यां निषादो जातः पारशवोऽपि वा ॥२॥ वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृ

तौ॥ वैश्यासु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः ॥३॥ ब्राह्मण्यां क्षत्रियात्सूतो वैश्या

द्वैदेहिकस्तथा॥ शूद्राज्जातस्तु चांडालः सर्वधर्मबहिःकृतः ॥४॥ क्षत्रिया मागधं वैश्या

Indira Gandhi National Centre for the Arts

(३) त शुद्राद्भृत्वारमेवच ॥ शुद्रादायोगवं वैश्यां जनयामास वै सुतं ॥५॥ १०
रत्थकारः प्रजायते । असत्संतं तु विज्ञेया प्रतिलोमानुलोमजाः ॥६॥ ॥ तप्पु
र्वे युगे ह्येषः सप्तमे पंचमेपिवा । व्यत्यये कर्म्मणां साम्यं पूर्ववच्चाधरोत्तरं ॥७॥ इ
ति जातिविवेक प्रकरणं ॥ कर्म्म स्मार्त्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही । दायकाले ४
हृतेवापि श्रौतं वैतानिकाग्निषु ॥१॥ शरीरचिंतां निर्वर्त्य कृतशौचविधिर्द्विजः । प्रा
तः संध्यामुपासीत दंतधावनपूर्वकं ॥२॥ हुत्वाग्नीन् सूर्यदैवत्यान् जपेन्मंत्रान् समा
हितः । वेदार्थानधीयीत शास्त्राणि विविधानि च ॥३॥ उपेयादीश्वरं चैव योगक्षे

५
वाक्पाणिपादचापल्यं वर्जयेच्चातिभोजनं ॥१६॥ अतिथिं श्रोत्रियं तृप्तमासीमांतमनुव्रजेत्
। अहः शेषं सहासीत शिष्टैरिष्टैश्च बंधुभिः ॥१७॥ उपास्य पश्चिमां संध्यां हुत्वाग्नींस्ता
नुपास्य च ॥ भृत्यैः परिवृतो भुक्त्वा नातितृप्त्याथ संविशेत् ॥१८॥ ब्राह्मे मुहूर्ते चोत्था
य चिंतयेदात्मनो हितं । धर्म्मार्थकामान्स्वे काले यथाशक्ति न हापयेत् ॥१९॥ विद्या
कर्म्मवयोबंधुवित्तैर्मान्या यथाक्रमं । एतैः प्रभूतैः शुद्रोपि वार्द्धके मानमर्हति ॥२०॥ वृ
द्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणां । पंथादेयो नृपस्तेषां मान्यः स्नातश्च नृपतेः
॥२१॥ इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च ॥ प्रतिग्रहोधिको विप्रे याजनाध्याप

Indira Gandhi National Centre for the Arts

(४)

द्मो५

पनेतथा ॥२२॥ प्रधानं क्षत्रिये कर्म प्रजा... पविपालनं । कुसीदकृषि वाणिज्यं पाशुपा
ल्यं विशः स्मृतं ॥२३॥ शूद्रस्य द्विजशु... ..तयाजीवन् वणिग्भवेत् । शिल्पैर्वा विविधै
र्जीवेत् द्विजातिहितमाचरेत् ॥२४॥ भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियारतः ॥ न
मस्कारेण मंत्रेण पंचयज्ञान्न हापयेत् ॥२५॥ अहिंसा सत्यमस्तेयं शौचमिंद्रियनि १०
ग्रहः । दानं दया क्षांतिः सर्वेषां धर्मसाधनं ॥२६॥ वयो बुध्यर्थ वाग्वेषश्रुतवित्तकुल
कर्मणां । आचरेत् सदृशीं वृत्तिमजिह्मामशठां तथा ॥२७॥ त्रैवार्षिकाधिकान्नो यः सहि

सोमं पिबेद् द्विजः ॥ प्राक्सौमिकीः क्रिया कुर्याद् यस्यान्नं वार्षिकं भवेत् । प्रतिसंवत्सरं सोमः
पशुः प्रत्ययनं तथा । कर्तव्याग्रयणेष्टिश्च चातुर्मास्यानि चैव हि ॥२९॥ एषामसंभवे कुर्या
दिष्टिं वैश्वानरीं द्विजः । हीनकल्पं न कुर्वीत सति द्रव्ये फलप्रदं ॥३०॥ चंडालो जायते य
ज्ञकरणाच्छूद्रभिक्षितात् । यज्ञार्थं लब्धमददद्भासः काकोपि वा भवेत् ॥३१॥ कुशूलकुंभीधान्यो
वा त्र्यैहिकोश्वस्तनोपि वा । जीवेद्वापि शिलोंछेन श्रेयानेषां परः परः ॥३२॥ इति गृह
स्थप्रकरणं ॥ न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः । न विरुद्धप्रसंगेन संतोषी च भ

Indira Gandhi National Centre for the Arts

वेसरा ॥१॥ राज्ञांतेवासियाज्योन्यः सीदं निछेद्धनं क्षुधा ॥ दांभिहैतुकपाषंडिवकवृत्तीश्च वर्ज-
येत् ॥२॥ शुक्लांबरधरो नीचकेशश्मश्रुनखः शुचिः । न भार्यादर्शनेश्नीयान्नैकवासा
न संस्थितः ॥३॥ न संशयं प्रपद्येत नाकस्मादप्रियं वदेत् । नाहितं नानृतं चैव न स्तेनः
स्यान्न वार्द्धुषी ॥४॥ दाक्षायणी ब्रह्मसूत्री वेणुमान् सकमंडलुः ॥ कुर्यात्प्रदक्षिणां देव
मृद्गोविप्रवनस्पतीन ॥५॥ न तु मेहेत नदीछायावर्त्मगोष्ठांबुभस्मसु । न प्रत्यग्न्यर्कगोसो
म संध्यांबुस्त्रीद्विजन्मनः ॥६॥ नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमैथुनां ॥ न च मूत्रपुरी ११

षं काजाश्रीवाशुतारकाः ॥७॥ अयोमवर्ज्यमित्येवं सर्वमंद्रमुदीरयेत् । वर्षात्यप्रावृतो गच्छे
स्वपेत्प्रत्यक्शिरा न च ॥८॥ ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सु न निक्षिपेत् । पादौ प्र
तापयेन्नाग्नौ न चैनमभिलंघयेत् ॥९॥ जलं पिबेन्नांजलिना न शयानं प्रबोधयेत् ।
नाक्षैः क्रीडेन्न धर्मघ्नैर्व्याधितैश्च न संविशेत् ॥१०॥ विरुद्धं वर्जयेत्कर्म प्रेतधूमं नदी-
तरं । केशभस्मतुषांगारकपालेषु च संस्थितं ॥११॥ नाचक्षीत धयंतीं गां नाद्वारेण
विशेत्क्वचित् । न च राजप्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनः ॥१२॥ प्रतिग्रहे सूना

च त्रिधा जिविरपानराबिपाः। दृष्टा दशगुणा पूर्वात्पूर्वादेते यथोत्तरं ॥१३॥ अध्यायाना
मुपाकर्म श्रावण्यां श्रवणेन च। हस्तेनौषधिभावे वा पंचम्यां श्रावणस्य तु ॥१४॥
पौषमासस्य रोहिण्यामष्टकायामथापि वा। जलांते छंदसां कुर्यादुत्सर्गं विधिवद्ब
हिः ॥१५॥ त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबंधुषु ॥ उपाकर्मणि चोत्सर्गे स्व 
शाखाश्रोत्रिये मृते ॥१६॥ संध्यागर्जितनिर्घातभूकंपोल्कानिपातने। समाप्य वेदं
द्युनिशमारण्यकमधीत्य च ॥१७॥ पंचदश्यां चतुर्दश्यामष्टम्यां राहुसूतके। ऋतु

संधिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च। पशुमंडूकनकुलश्वाहिमार्जारमूषकैः ॥
कृतेंतरे त्वहोरात्रं शक्रपाते तथोच्छ्रये ॥१८॥ श्वक्रोष्टुगर्दभोलूकसामबाणार्त
निःस्वने। अमेध्यशवशूद्रांत्यश्मशानपतितांतिके ॥२०॥ देशेऽशुचावात्मनि च विद्यु
त्स्तनितसंप्लवे। भुक्त्वार्द्रपाणिरंभोंतरर्द्धरात्रेऽतिमारुते ॥२१॥ पांशुवर्षे दिशां
दाहे संध्यानीहारभीतिषु ॥ धावतः पूतिगंधे च शिष्टे च गृहमागते ॥२२॥ खरोष्ट्र
यानहस्त्यश्वनौवृक्षगिरिरोहणे। सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्

Indira Gandhi National Centre for the Arts

(८)

त्विदुः॥ देवर्त्विकस्नातकाचार्यराज्ञांछायांपरस्त्रियाः। नाक्रामेद्रक्तविण्मूत्रष्ठीवनो
द्वर्त्तनानिच॥२४॥ विप्राहिक्षत्रियात्मानो नावज्ञेयाकथंचन। आमृत्योःश्रियमका
मांक्षेन्नकंचिन्मर्म्मणिस्पृशेत्॥२५॥ दूराडुछिष्टविन्मूत्रपादांभांसिसमुत्सृजेत्
श्रुतिस्मृत्युदितंसम्यङ्नित्यमाचारमाचरेत्॥२६॥ कर्म्मणामनसावाचायत्नाद्धर्म्म
समाचरेत्। अस्वर्ग्यंलोकविद्विष्टंधर्म्ममथाचरेन्नतु॥२८॥ मातृपितृतिथिभ्रातृजा
मिसंबंधिमातुलैः। वृद्धबालातुराचार्यवैद्यसंसृतबांधवैः॥२९॥ ऋत्विक्पुरोहितापत्य

भार्यादाससनाभिभिः। विवादंवर्जयित्वातुसर्वाल्लोकाञ्जयेद्गृही॥३०॥ पंचपिंडाननुद्धृ
त्यनस्नायात्परवारिषु। स्नायांनदीदेवखातह्रदप्रस्रवणेषुच॥३१॥ परशय्यासनोद्या
नगृहयानानिवर्जयेत्। अदत्तान्यग्निहीनस्यनान्नमद्यादनापदि॥३२॥ कदर्यब
धचौराणां क्लीवरंगावतारिणां। वैणाभिशस्तवार्द्धुष्यगणिकागणदीक्षिणां।॥३३॥ चि
कित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषां॥ क्रूरोग्रपतितव्रात्यदांभिकोछिष्टभोजि
नां॥३४॥ अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनां। शस्त्रविक्रयिकर्म्मारतंत्रवाय

१२

Indira Gandhi National
Centre for the Arts

(८)

ऋवर्त्तिनां ॥२५॥ नृशंसराजरजककृतघ्नवधजीविनां ॥ चैलधावसुराजीवसहोपपतिवे
श्मनां ॥२६॥ पिशुनानृतिनोश्चैव तथा चाक्रिकवन्दिनां ॥ एषामन्नं न भोक्तव्यं सोमविक्रे
यिनस्तथा ॥२७॥ शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः । भोज्यान्ना नापितश्चैव य
श्चात्मानं निवेदयेत ॥ इति स्नातकप्रकरणं ॥ अनर्चितं वृथा मांसं केशकीटसमन्वितं । १४
शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितं ॥१॥ उदक्यास्पृष्टसंघुष्टं पर्यायान्नं च वर्ज
येत । गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टं च कामतः ॥२॥ अन्नं पर्युषितं भोज्यं स्नेहाक्तं

चिरसंस्थितं । अस्नेहा अपि गोधूमयवगोरसविक्रिया ॥३॥ संधिनिक्षीरमवत्साया निर्द्दशा
ह समाप्यः परिवर्जयेत । औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकं । देवतार्थं हवि
शिग्रुलोहितान्वृश्चनांस्तथा । अनुपाकृतमांसानि विड्जानि कवकानि च । क्रव्यादपं
क्षिदात्यूहशुकप्रतुदटिट्टिभान । सारसैकशफान्हंसान्सर्वांश्च ग्रामवासिनः ॥४॥
कोयष्टिप्लवचक्राह्वबलाकाबककविष्किरान् । वृथाकृसरसंयावपायसापूपशष्कुलीः ॥५॥
कलविंकं सकाकोलं कुररं रज्जुदालकं । जालपादान खञ्जरीटान अज्ञातांश्च मृगद्विजा

Indira Gandhi National Centre for the Arts

(९)

चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च। मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्
॥९॥ पलाण्डुं विड्वराहं च छत्राकं ग्रामकुक्कुटं। लशुनं गृंजनं चैव जग्ध्वा चांद्रायणं चरे-
त्॥१०॥ नक्राः पंचनखाः सेधा गोधा कच्छपसल्लकाः। राजस्य मत्स्येष्वपि हि हिंसि-
तुं तु न कर्बोदिताः॥११॥ तथा पाठीनराजीवसशल्काश्च द्विजातिभिः। अतः श्रृणु
धुं मांसस्य विधिं तत्त्वानि॥१२॥ प्राशीतयेतथा श्राद्धे प्रोक्षितं द्विजकाम्यया। १५
देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दुष्यति॥१३॥ वसेन्न नरा घोरे दिनानि पशु-

ओमान्तः। संमितानि तु तावन्ति यो हंत्यविधिना पशून्॥१४॥ सर्वान् कामानवाप्नोति
हयमेधफलं लभेत्। गृहेऽपि निवसन् विप्रो मुनिर्मांसस्य वर्जनात्॥ इति नक्षत्र
स्य प्रकरणं॥ सौवर्णराजताब्जानां मधुपात्रं गृहाश्मनां। शाकरज्जुमूलफलवा
सो विदलचर्मणां॥१॥ पात्राणां च मनाद्वारिशुद्धिरिष्यते। चरुस्रुक्स्रुवसंवे
स्नेहपात्राण्युष्णेन वारिणा॥२॥ स्फ्य शूर्पाजिनधान्यानां मुषलोलूखलानसां। प्रोक्ष-
णं संहतानां च बहूनां धान्यवाससां॥ तक्षयादरश्च भाण्डस्थं गोवालैः फलःसं-
भवैः। मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि॥४॥ सोषैरुदकगोमूत्रैः शुध्यत्याविं-

Indira Gandhi National Centre for the Arts

(१०)

कक्षौषिकं॥ सश्रीफलैरंशुपट्टं सारिष्टैः कुतपं तथा ॥५॥ सगौरसर्षपैः क्षौमं पुनः पाका
न्महीमयं॥ कारुहस्तः शुचिः पण्यं नैक्ष्यं योषिन्मुखं तथा ॥६॥ भूशुद्धिर्मार्जनाद्दाहात्का
लाद्गोक्रमणात्तथा। सेकादुल्लेखनाल्लेपाद्गृहं मार्जनलेपनात् ॥७॥ गोघ्रातेन्नेत
था केशमक्षिकाकीटदूषिते। सलिलं भस्ममृद्वापि प्रक्षेप्तव्यं विशुद्धये ॥८॥
त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः। भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावो १६
द्रवस्य तु ॥९॥ अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गन्धादिकर्षणात्। वाक्शस्तमम्बुनि
र्णिक्तमज्ञातं च सदा शुचि ॥१०॥ शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतं तथा। मांसं

श्वचाण्डालक्रव्यादनिपातितं ॥११॥ रश्मिरग्निरजश्छाया गौरश्वो वसुधानिलः। विप्रुषो मक्षि
काः स्पर्शे वत्सः प्रस्रवणे शुचिः ॥१२॥ अजाश्वयोर्मुखं मेध्यं न गोर्न नरजा मलाः। पन्था
नश्च विशुध्यन्ति सोमसूर्यांशुमारुतैः ॥१३॥ मुखजा विप्रुषो मेध्यास्तथाचमनबिन्दवः। श्मश्रु
चास्यगतं दन्तसक्तं त्यक्त्वा ततः शुचिः ॥१४॥ स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे
। आचान्तः पुनराचामेद्वासो विपरिधाय च ॥१५॥ रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववा
यसैः॥ मारुतेनैव शुध्यन्ति पक्वेष्टकचितानि च ॥१६॥ इति द्रव्यशुद्धिप्रकरणं। तपस्तप्त्वा
सृजद्ब्रह्मा ब्राह्मणान्वेदगुप्तये। तृप्त्यर्थं पितृदेवानां धर्मसंरक्षणाय च ॥१॥ सर्वस्य

प्र नवो विप्राः श्रुताध्ययनशालिनः । तेभ्यः क्रियापरा श्रेष्ठास्तेभ्यो ध्यानभावितमः ॥२॥ नविद्यया
केवलया तपसा वापि पात्रता ॥ यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितं ॥३॥ गोभूति
लहिरण्यादि पात्रे दातव्यमर्चितं । नापात्रे विदुषा किंचिदात्मनः श्रेय इच्छता ॥४॥ विद्यातपोभ्यां ही
नेन न तु ग्राह्यः प्रतिग्रहः । गृह्णन् प्रदातारमधो नयत्यात्मानमेव च ॥५॥ दातव्यं प्रत्यहं पात्रे १२
निमित्तेषु विशेषतः । याचितेनैव दातव्यं श्रद्धापूतं तु शक्तितः ॥६॥ हेमशृंगी शफै रौप्यैः सुशी
लावस्त्रसंयुता । सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा ॥७॥ दातास्याः स्वर्गमाप्नोति वत्स
रान् रोमसम्मितान् । कपिला चेत्तारयति भूयश्चासप्तमं कुलं सवत्सा रोमतुल्यानि युगान्युभयतोमु



खीं ॥ दातास्याः स्वर्गमाप्नोति पूर्वेण विधिना ददत् ॥९॥ यावद्वत्सस्य पादौ द्वौ मुखं योन्यां च दृश्यते ।
तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुंचति ॥१०॥ यथाकथंचिद्दत्वा गां धेनुं वाधेनुमेव वा । अरोगा
मपरिक्लिष्टां दाता स्वर्गे विधीयते ॥११॥ श्रान्तसंवाहनं रोगिपरिचर्या सुरार्चनं । पादशौचं द्विजोच्छि
ष्टमार्जनं गोप्रदानवत् ॥१२॥ भूदीपाश्चान्नवस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् । नैवेशिकं स्वर्णधुर्या
न्दत्वा स्वर्गे महीयते ॥१३॥ गृहधान्याभयोपानच्छत्रमाल्यानुलेपनैः ॥ यानं वृक्षं प्रियं शय्यां दत्वात्यंतं
सुखी भवेत् ॥१४॥ सर्वधर्ममयं ब्रह्म प्रदानेभ्योऽधिकं यतः । तद्ददत्समवाप्नोति ब्रह्मलोकमविच्युतं
॥१५॥ प्रतिग्रहसमर्थोऽपि नादत्ते यः प्रतिग्रहं ॥ ये लोका दानशीलानां स तान् प्राप्नोति पुष्कलान् ॥१६॥
मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च ॥१७॥ अया
कुशाः शाकं पयो मत्स्या गंधाः पुष्पं दधि क्षितिः

Indira Gandhi National
Centre for the Arts

(१२)

वितहतंयाद्यमि पितृच्छ्कृतकर्म्मणः। अन्यत्रकांलतःस्वंडप्रतितिःयस्तथाद्विषः॥१८॥ दैवातिथ्यर्च्चन
कृते गुरुकृत्यार्थमेव च। सर्वतः प्रतिगृह्णीयादात्मवृत्यर्थमेव वा॥१९॥ इतिदानप्रकरणं॥ ४॥
अमावास्याष्टकावृद्धिः कृष्णपक्षोयनद्वयं। द्रव्यंब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः॥१॥ व्यती १८
पातोगजछायाग्रहणंचंद्रसूर्ययोः। श्राद्धंप्रतिरुचिश्चैवश्राद्धकालाःप्रकीर्तिताः॥२॥ अग्र्याःस
र्वेषुवेदेषु श्रोत्रियोब्रह्मविद्युवा। वेदार्थविज्ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णिकः॥३॥ स्वस्रीयऋत्विक्
जामातृयाज्यश्वशुरमातुलाः। त्रिणाचिकेतदौहित्रशिष्यसंबंधिबांधवाः॥४॥ कर्म्मनिष्ठास्तपोनिष्ठाः पंचा
ग्निब्रह्मचारिणः। पितृमातृपराश्चैवब्राह्मणाः श्राद्धसंपदः॥५॥ रोगीहीनातिरिक्तांगः का
णःपौनर्भवस्तथा। अवकीर्णीकुंडगोलौकुनखीश्यावदंतकः॥६॥ भृतकाध्यापकःक्लीवःकन्यादूष्याभि

श्रि:१

शस्तकः। मित्रध्रुक्पिशुनःसोमविक्रयीपरिविंदकः॥७॥ मातापितृगुरुत्यागीकुंडाशीवृषलात्म
जः परपूर्वापतिस्तेनः कर्म्मदुष्टाश्च निंदिताः॥८॥ निमंत्रयेतपूर्वेद्युर्ब्राह्मणानात्मवान्शुचिः।
तैश्चापिसंयतैर्भाव्यं मनोवाक्कायकर्म्मभिः॥९॥ अपराह्णेसमभ्यर्च्य स्वागतेनागतांस्तुतान्
पवित्रपाणिराचांतानासनेषूपवेशयेत्॥१०॥ दैवेयुग्मान्यथाशक्ति पित्र्येअयुग्मांस्तथैव च। परि
श्रितेशुचौदेशे दक्षिणाप्रवणेतथा॥११॥ द्वौ वा दैवे प्राक्त्रयः पित्र्य उदगेकैकमेव वा। माता
महानामप्येवं तंत्रं वा वैश्वदेविकं॥१२॥ पाणिप्रक्षालनं दत्वा विष्टरार्थं कुशानपि। आवाहये
दनुज्ञातो विश्वेदेवास इत्यृचा॥१३॥ यवैरन्ववकीर्याथ भाजने सपवित्रके। शन्नोदेव्या

Indira Gandhi National Centre for the Arts

८२

(९३) यव:

पयः। शंनोदेव्यायवोसीति यवस्तथा ॥१४॥ या दिव्या इति मंत्रेण हस्तेष्वर्घ्यं विनिक्षिपेत् । मंकुच

दत्वोदकं गंधमाल्यं धूपदानं सदीपकं ॥१५॥ तथाच्छादनकं चैव कारशी चार्घमुद

अपसव्यं ततः कृत्वा पितॄणामप्रदक्षिणं ॥ द्विगुणांस्तु कुशान् कृत्वा उशंत स्त्वेत्यृ १९

चा पितॄन् । आवाह्य तदनुज्ञातो जपेदायंतु नस्तथा ॥१७॥ यवार्थस्तु तिलैः कार्यः

कुर्यादर्घ्यादि पूर्ववत् । दत्वार्घ्यं संस्रवांस्तेषां पात्रे कृत्वा विधानतः ॥१८॥ पितृभ्यः

---

स्थानमसीति न्युब्जं पात्रं करोत्यधः । अग्नौ करिष्यन्नादाय पृच्छत्यन्नं घृतप्लुतं

। कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ पितृयज्ञवत् । हुतशेषं प्रदद्यात्तु भाजनेषु स

माहितः ॥२०॥ यथालाभोपपन्नेषु रौप्येषु तु विशेषतः । दत्वान्नं पृथिवी पात्रमिति पा

त्राभिमंत्रणं ॥२१॥ कृत्वेदं विष्णुरित्यन्ने द्विजांगुष्ठं निवेशयेत् । सव्याहृतिकां गाय

त्रीं मधुवाता इति त्र्यृचं ॥२२॥ जप्त्वा यथासुखं वाच्यं तु जीवं स्तोपिवाग्यतः । अन्नमिष्टं हवि

ष्यं च दद्यादक्रोधनोत्वरः ॥२३॥ आतृप्तेस्तु पवित्राणि जप्त्वा पूर्वं जपं तथा । अन्न

यन्नमादाय तृप्ताः स्थ शेषं चैवानुमान्य च ॥२४॥ तदन्नं विकिरेद्भूमौ दद्याच्चापः सकृत्सकृत
पूर्वमन्नमुपादाय सतिलं दक्षिणामुखः ॥२५॥ उच्छिष्टसं निधौ पिण्डान् दद्याद्वै पितृ
यज्ञवत्। मातामहानामप्येवं दद्यादाचमनं ततः ॥२६॥ स्वस्तिवाच्यं ततः कुर्यादक्ष
य्योदकमेव च। दत्त्वा तु दक्षिणां शक्त्या स्वधाकारमुदाहरेत्। वाच्यतामित्यनुज्ञा २०
तः प्रकृतेभ्यः स्वधोच्यतां। ब्रूयुरस्तु स्वधेत्युक्ते भूमौ सिञ्चेत्ततो जलं ॥२८॥ वि
श्वेदेवाश्च प्रीयन्तां विप्रैश्चोक्त इदं जपेत्। दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च

श्रद्धा च नो मा व्यगमद्बहुदेयं च नोऽस्त्विति। इत्युक्त्वोक्त्वा प्रियावाचः प्रणिपत्य विसर्ज
॥३०॥ वाजेवाजे इति प्रीतः पितृपूर्वं विसर्जनं। यस्मिंस्ते संस्रवाः पूर्वमर्घ्यपात्रे
निवेशिताः। पितृपात्रं तदुत्तानं कृत्वा विप्रान् विसर्जयेत्। प्रदक्षिणमनुव्रज्य भुञ्जीत पि
तृ- ॥३२॥ ब्रह्मचारी भवेत्तां तु रजनीं ब्राह्मणैः सह। एवं प्रदक्षिणावृत्को वृद्धौ ना
न्दीमुखान् पितॄन् ॥३३॥ यजेत दधिकर्कन्धुमिश्रान् पिण्डान् यवैः क्रियाः। एकोद्दिष्टं दै
वहीनमेकार्घ्यैकपवित्रकं ॥३४॥ आवाहनाग्नौकरणरहितं ह्यपसव्यवत् ॥ उपति
॥

कुर्यात्स्थाने विप्रविसर्जनं ॥२५॥ अजिरस्थामिति वदेद्युस्ते निरतास्मह । गंधोद
कैर्युतं कुर्यात्पात्रचतुष्टयं ॥२६॥ अर्घार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्
॥ मानादृतिद्वाभ्यां शेषं पूर्ववदाचरेत् ॥२७॥ एतत्सपिंडीकरणमेकोद्दिष्टं स्त्रिया २
॥ अर्वाक्सपिंडीकरणमेकोद्दिष्टं यथा संवत्सराद्भवेत् ॥२८॥ तस्याप्यन्नं सो
दकुंभं दद्यात्संवत्सरं द्विजे ॥ मृतेहनि तु कर्तव्यं प्रतिमासं तु संवत्सरं ॥२९॥ प्रतिसं
वत्सरं चैवमाद्यमेकादशाहनि । पिंडांस्तु गोजविप्रेभ्यो दद्यादग्नौ जलेपि वा ॥४०॥ प्र

क्षिप्सु विप्रेषु द्विजोच्छिष्टं न मार्जयेत् । हविष्यान्नेन वै मासं पायसेन तु वत्सरं ॥४१॥
॥ हिसा औरभ्रशाकुनच्छागपार्षतैः । ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमं ॥४२॥ मा
सवृद्ध्याभितृप्यंति दत्तैरिह पितामहाः । खड्गामिषं महाशल्कं मधु मुन्यन्नमेव च । लोहामि
षं महाशाकं मांसं वार्ध्रीणसस्य च । यद्ददाति गयास्थश्च सर्वमानंत्यमश्नुते । तथा व
र्षात्रयोदश्यां मघासु च न संशयः । कन्यां कन्यावेदिनश्च पशून्वै सत्सुतानपि ॥४५॥ द्यू
तं कृषिं वाणिज्यं च द्विशफैकशफांस्तथा । ब्रह्मवर्चस्विनः पुत्रान् स्वर्णरूप्ये सकुप्यके

ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा । प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा च
र्दशीं ॥४७॥ शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते । स्वर्गं ह्यपत्यमोजश्च शौर्यं
क्षेत्रं बलं तथा ॥४८॥ पुत्रं श्रैष्ठ्यं ससौभाग्यं समृद्धिं मुख्यतां शुभां । प्रवृत्तचक्रतां चै
व वाणिज्यप्रभृतीनि च ॥४९॥ अरोगित्वं यशो वीतशोकतां परमां गतिं । धनं वेदान्
भिषक्सिद्धिं कुप्यं गामप्यजाविकं ॥५०॥ अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छति ।
कृत्तिकादिभरण्यंते स कामानाप्नुयादिमान् ॥५१॥ आस्तिकः श्रद्दधानश्च व्यपेत २२

मत्सरः । वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः ॥५२॥ प्रीणयंति मनुष्याणां पितॄन्
तर्पिताः । आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च । प्रयच्छंति तथा राज्यं
नृणां पितामहाः ॥५४॥ इति श्राद्धप्रकरणं ॥ विनायकः कर्मविघ्नसिद्ध्यर्थं वि
गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा ॥ तेनोपसृष्टो यस्तस्य लक्षणा
वगाहतेऽत्यर्थं जलं मुंडांश्च पश्यति ॥२॥ काषायवाससश्चैव क्रव्यादां
। [illegible] नैकपृष्ठेः संसिकत्रावतिष्ठति ॥३॥ व्रजन्नपि तथात्मानं

[illegible] तेविफलारंभः ससीदत्यनिमित्ततः॥४॥ तेनोपसृष्टोलब्ना
र्तन्दः। कुमारीनचभर्तारमपत्यंगर्भमंगना॥५॥ आचार्यत्वंश्रोत्रि
[illegible] तथा। वणिग्लाभंनचाप्नोति कृषीचापिकृषीवलः।६॥ स्नपनं २२
[illegible] विधिपूर्वकं। गौरसर्षपकल्केन साज्येनोत्सादितस्यच॥७॥ सर्वौ
षधैःसर्वगंधैःप्रलिप्तशिरसस्तथा। भद्रासनोपविष्टस्यस्वस्तिवाच्याद्विजाःशुभाः॥
अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात्। मृत्तिकांरोचनांगंधान्गुग्गुलुं

लिं॥२०॥ रूपंदेहियशोदेहि भगंभगवतिदेहिमे। पुत्रान्देहिधनंदेहिसर्वान्कामांश्च
देहिमे॥२१॥ ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनः॥ ब्राह्मणान्भोजयेद्दद्याद्व
स्त्रयुग्मंगुरोरपि॥२२॥ एतस्यसदापूज्यांतिलकंस्वामिनस्तथा। महागणपतेश्चैवकुर्व
न्सिद्धिमवाप्नुयात्॥२३॥ श्रीकामःशांतिकामोवाग्रहयज्ञंसमारभेत्। वृष्ट्यायुः
पुष्टिकामोवाभिचरन्नपि॥२४॥ एवंविनायकंपूज्यग्रहांश्चैव विधानतः। कर्मणां
फलमाप्नोति। श्रियंप्राप्नोत्यनुत्तमां॥२५॥ सूर्यःसोमोमहीपुत्रःसोमपुत्रोबृ

Indira Gandhi National
Centre for the Arts

हस्पतिः। शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः क्रमात्॥ २६॥ ताम्रकात्स्फटिकाद्रक्त
चंदनात्सुवर्णकावुभौ॥ रजतादयसः सीसात्कांस्यात्कार्या ग्रहाः क्रमात्॥ २७॥ भास्क
रांगारकौ रक्तौ शुक्लौ शुक्रनिशाकरौ। सोमपुत्रो गुरुश्चैव तावुभौ पीतकौ स्मृतौ॥२८॥
कृष्णं शनैश्चरं विद्याद्राहुं केतुं तथैव च। स्ववर्णैर्वा पटे लेख्याः गंधैर्मंडलकेषु च॥ २५
२९॥ यथावर्णं प्रदेयानि वासांसि कुसुमानि च। गंधाश्च बलयश्चैव धूपो देयश्च गु
ग्गुलुः॥३०॥ कर्त्तव्या मंत्रवंतश्च चरवः प्रतिदैवतं। आकृष्णेन इमं देवा अग्निर्मू

र्द्धा दिवः ककुत्॥३१॥ उद्बुध्यस्वेति च ऋचो यथासंख्यं प्रकीर्त्तिताः। बृहस्पतेऽतियदर्य
स्तथैवान्नात्परिस्रुतः॥३२॥ शन्नो देवीस्तथा कांडात् केतुं कृण्वन्निमास्तथा॥ अर्कः
पलाशखदिरश्चापामार्गोऽथ पिप्पलः। उदुंबरः समी दूर्वा कुशाश्च समिधः क्रमा
त्। एकैकस्य त्वष्टशतमष्टाविंशतिरेव वा॥३४॥ होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा
पुनः। गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकं॥३५॥ दध्योदनं हविश्चूर्णं मासं चित्रा
न्नमेव च॥ दद्याद्ग्रहक्रमादेतद्विजेभ्यो भोजनं बुधः॥ शक्तितो वा यथालाभं सत्कृत्य वि

Indira Gandhi National Centre for the Arts

।अपूर्व्वकं॥ ३६॥ धनुः॥ शखस्तथा नज्ञान [illegible]

।अपूर्व्वकं॥३६॥धनुः॥शखस्तथा।नज्ञानइ मवासोह यसाथा। कृष्णा गोवायसंश्च ॥ए
।अपूर्व्वकं॥३६॥धनुः॥शखस्तथा।नज्ञानइमवासोहयसाथा। कृष्णागोवायसंश्चा॥ए
तावेद क्रियाा क्रमात ॥३७॥ अस्पष्टश्चयदा कुरु सतं यत्न नपूजयेत्। ब्रह्मणोत्तां २६
वरोत्त्वा पूजिताः पूजयिष्यथ ॥३८॥ महाधीनां नविद्वाणां मुख्याः पतनान्य च।
नावानावो वेजगतः स्तस्मा त्पूज्यतमा ग्रहाः॥ ३९॥ इति ग्रह शांति प्रकरणं ॥
महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः। विनीतः सत्वसंपन्नः कुलीनः सत्यवा
क् शुचिः॥१॥ अदीर्घसूत्रः स्मृतिमान् क्षुद्रापकः स्तथा। धार्म्मिकोव्यसनश्चैवप्रा

ः सूरोरहस्यवित् ॥२॥ स्वरंध्रगोप्ता न्वीक्षिक्यां दंडनीत्यां स्तथैवच। विनीतस्त्वथवार्त्ता
याणं चैव नराधिपः॥३॥ समंत्रिणः प्रकुर्व्वीत प्राज्ञान्मौलान् स्थिरान् शुचीन
सार्द्धं चिंतयेद्राज्यं विप्रेनाथ ततः स्वयं ॥४॥ पुरोहितं प्रकुर्व्वीत दैवज्ञमुदितोदितं
तनीत्यां च कुशलमथर्वांगिरसे तथा ॥५॥ श्रौतस्मार्त्त क्रियाहेतोर्वृणुयाद्द्विजस्त
। यताश्चैव प्रकुर्व्वीत विविधक्रूविदक्रियाः॥६॥ लोगांश्चदद्या द्विप्रेभ्यो वसूनि विवि
निच। अक्षयोयं निधीराज्ञां यद्विप्रेषूपपादितं ॥७॥ अलब्धं मीहेधर्मेण लब्धं यत्ने

(२०)

पालयेत् । पालितं वर्द्धयेन्नीत्या वृद्धं पात्रेषु निक्षिपेत् ॥८॥ अस्कन्नमव्यथं चैव प्रायश्चि
त्तैरदूषितं ॥ अग्नेः सकाशाद्विप्राग्नौ हुतं श्रेष्ठमिहोच्यते ॥९॥ देवान्नृपान्निर्बन्धं वा
...ले स्वयं तु कारयेत् । आगामि न्दृपतिं बिता नायपार्थिवः ॥१०॥ पदैर्वा ता[illegible]पत्रेवा
मुद्रोपविधि द्धितं । आत्मनेस्यात्मनो वंशपानां तेनं महीपतिः ॥११॥ प्रतिग्रहपरिमाणं
नक्षेदोपवर्णितं । स्वहस्तकालसंपन्नं शासनं कारयेत्स्थिरं ॥१२॥ रम्यं पशव्यमाजीव्यं
जांगलं देशमाविशेत् । तत्र दुर्गाणि कुर्वीत जनकोशात्मगुप्तये ॥१३॥ तत्र तत्र च नि
...ज्ञान्नक्षण्डानकुशलान्शुचीन् । प्रकुर्यादायकर्म्मान्तं व्ययकर्मसु चोद्यतान्
ज्ञातान नध्यक्षान कुशलान्शुचीन् । २२

---

चाश्रो[illegible]व्ययाणां गृहाराणां च ॥२५॥ ब्राह्मणेषु क्षमी स्निग्धे जिह्मः क्रोधनो रिपुषु स्या
त्यवर्त्तेच प्रजासु च यथा पिता ॥२६॥ पुण्यात्षड्भागमादत्ते न्यायेन परिपालयन्
शनाछकं यस्मात्प्रजानां परिपालनं ॥२७॥ चाटतस्करदुर्वृत्तमहासाहसिकादि
। पीड्यमाना प्रजा रक्ष्यौ त्कायस्थैश्च विशेषतः ॥२८॥ अरक्ष्यमाणा कुर्वन्ति यत्किंचित्कि
जाः । तस्मात्तु नृपतेरर्द्धं यस्माद्गृह्णात्य सोकवान् ॥२९॥ ये राष्ट्राधिकृतास्तेषां
ज्ञात्वा विचेष्टितं । साधून्संमानयेद्राजा विपरीतांश्च घातयेत् ॥३०॥ उत्कोचजी

Indira Gandhi National
Centre for the Arts

(२३)

नोद्वयहीनान कृत्वा विश्वसेत्। सदानुमानसत्कारैः श्रोत्रियान्वासयेत्सदा ॥२१॥ अ
नेन नृपो राज्यस्य कोशं च विवर्द्धयेत्। सोचिराद्विगतश्रीको नाशमेति सबांधवः॥
॥ प्रजापीडनसंतापात्समुद्भूतो हुताशनः। राज्ञः श्रियं कुलं प्राणान्नादग्ध्वा २८
नेव नीतिः ॥२३॥ य एवं नृपते द्रुमं स्त्रवा बुध परिपालयन्। तमेव कुसुमाप्नोति
नवृत्तं वसंनयेत् ॥२४॥ यस्मिन्देशे य आचारो व्यवहारः कुलस्थितिः। तथैव परिपा
सौ यदा वशमुपागतः ॥२५॥ मंत्रमूलं यतो राज्यमतो मंत्रः सुरक्षितः। कुर्याद्य

थास्य न विदुः कर्म्मारंभं फलोदयात् ॥२६॥ अरिर्मित्रमुदासीनोऽनंतरस्तत्परः परः
क्रमात्। मंडलं चिंत्यं सामादिभिरुपक्रमैः ॥२७॥ उपायाः सामदानं च भेदो दंडस्तथैव
च। सम्यक्प्रयुक्ताः सिध्येयुर्दंडस्त्वगतिः का गतिः ॥२८॥ संधिं च विग्रहं यानमासनं
संश्रयं तथा। द्वैधीभावं गुणानेतान्यथावत्परिकल्पयेत् ॥२९॥ यदा सस्य गुणोपेतं
परराष्ट्रं पतिं त्यजेत् तदा व्रजेत्॥ परश्च हीन आत्मा च हृष्टवाहनपुरुषः ॥४०॥ दैवे पु
रुषकारे च कर्म्मसिद्धिर्व्यवस्थिता॥ तत्र दैवमभिव्यक्तं पौरुषं पौर्वदैहिकं ॥४१॥ के

Indira Gandhi National Centre for the Arts

(२२)

विदैवा स्वेनावाप्तकालात्पुरुषकारतः। संयोगो विवि दिशंति फलं कुसलवुद्धयः॥४२॥
यथा ह्येकेन चक्रेण रथस्य न गतिर्भवेत्। एवं पुरुषकारेण विना दैवं न सिध्यति॥४३॥
हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः। अतोऽनिनतत्प्राप्तौ रक्षेत्सत्यं समा ३०
हितः॥४४॥ स्वाम्यमात्यजनो दुर्गं कोशो दंडस्तथैव च। मित्राण्येताः प्रकृतयो राज्यं स
प्तांगमुच्यते॥४५॥ तदवाप्य नृपो दंडं दुर्वृत्तिषु निपातयेत्। धर्मो हि दंडरूपेण ब्रह्म
णा निर्मितः पुरा॥४६॥ स नेतुं न्यायतोऽशक्यो लुब्धेनाकृतबुद्धिना। सत्यसंधेन शु

चिना सुसहायेन धीमता॥४७॥ यथाशास्त्रं प्रयुक्तस्तु सदेवासुरमानुषं। जगदानंदये
त्सर्वमन्यथा तत्प्रकोपयेत्॥४८॥ अधर्मदंडनं स्वर्गकीर्तिलोकविनाशनः। सम्यक्तु
दंडनं राज्ञां स्वर्गकीर्तिजयावहं॥४९॥ अपि भ्राता सुतोऽर्घ्यो वा श्वसुरो मातुलो
पि वा। नादंड्यो नाम राज्ञोऽस्ति धर्माद्विचलितः स्वकात्॥५०॥ यो दंड्यान्दंडयेद्राजा
संम्यग्वध्यांश्च घातयेत्। इष्टं स्यात्क्रतुभिस्तेन समाप्तवरदक्षिणैः॥५१॥ इति सं
चिंत्य नृपतिः क्रतुतुल्यफलं पृथक्॥ व्यवहारान्स्वयं पश्येत्सभ्यैः परिवृतोऽन्वहं॥५२॥

कुलानिजातीःश्रेणीश्चगणान्जनपदानपि।स्वधर्म्माच्चलितानराजाविनीयस्थापये
त्पथि॥५३॥ जालसूर्यमरीचिस्थं त्रसरेणु रजः स्मृतं। तेष्टौ लिक्षास्तु तास्तिस्रो
राजसर्षपउच्यते ॥५४॥ गौरस्तु ते त्रयः षड्भिः यवो मध्यस्तु ते त्रयः ॥ कृष्णलः
पंच ते माषकाः ते सुवर्णस्तु षोडश ॥५५॥ पलं सुवर्णाश्चत्वारः पंच वापि प्रकीर्त्तितं
॥ द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते ॥५६॥ शतमानं तु दशभिर्धरणैः प
लमेव तु। निष्कः सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः ॥५७॥ साशीतिपण



साहस्रोदंड उत्तमःसाहसः। तदर्द्धं मध्यमःप्रोक्तः तदर्द्धं मध्यमःस्मृतः॥५८॥
।धिग्दंडोस्त्वथवाग्दंडो धनदंडो वधस्तथा।योज्याव्यस्तसमस्तावाप्यपराधवशादि
मे॥५९॥ ज्ञात्वापराधंदेशंचकालंबलमथापिवा।वयःकर्म्मचवित्तंचदंडंदंड्येषु
पातयेत्॥६०॥ इतिराजधर्म्मप्रकरणं॥※॥इतियाज्ञवल्कीये धर्म्मशास्त्रे आचाराध्य
र्म्मेनाम प्रथमोध्यायःसमाप्तः॥※॥व्यवहारान्नृपःपश्येद्विद्वद्भिःब्राह्मणैःसह।ध
र्म्मशास्त्रानुसारेण क्रोधलोभविवर्जितः॥१॥ श्रुताध्ययनसंपन्नाः धर्म्मज्ञाःस

Indira Gandhi National Centre for the Arts

२४

यवादिनः। राज्ञा सभासदः कार्य्या रिपौ मित्रेष्वये समा ॥२॥ अपश्यता कार्य्यवशाद्व्यवहा
नृपेण तु॥ सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्व्वधर्म्मवित् ॥३॥ रागाल्लोभा भयाद्वापि
स्मृत्यपेतादिकारिणः। सभ्याः पृथक्पृथक्दंड्या विवादाद्द्विगुणं दमं ॥४॥ स्मृत्याचारव्य २२
पेतेन मार्गेणाधर्षितः परैः॥ आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥५॥ प्रत्यर्थिनोऽग्रतो
लेख्यं यथावेदितमर्थिना॥ समामासतदर्द्धाहर्नामजात्यादिचिह्नितं। नाबाधायाः उत्तरं
यावन्नुत्यर्थि पूर्णं लेखयेत्॥ अर्थीनु लेखयेत्तावद्यावद्वस्तु विवक्षितं ॥६॥ श्रुतार्थस्योत्तरं

लेख्यं पूर्वावेदकसन्निधौ॥ ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनं ॥७॥ तत्सिद्धौ सिद्धिमाप्नो
ति विपरीतमथाँतोऽन्यथा॥ चतुःपाद्व्यवहारोऽयं विवादेषूपदर्शितः ॥८॥ अभियोगमनिस्ती
र्य्य नैनं प्रत्यभियोजयेत्। अभियुक्तं तत्तः न चान्येन नोक्तं विकृतिं नयेत् ॥१०॥ कुर्य्यात्प्र
त्यभियोगं तु कलहे साहसेषु च। उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये ॥११॥
निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समं। मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत्॥
साहसस्तेयपारुष्यगोऽभिशापात्यये स्त्रियां। विवादयेत्सद्य एव कालोऽन्यत्रेच्छया स्मृतः ॥१२॥

Indira Gandhi National
Centre for the Arts

२२

देशाद्देशान्तरं याति सृक्किणी परिलेढि च । ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च ॥१४॥ परिशु-
ष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते । वाक्चक्षुः पूजयति नो तथोष्ठौ निर्भुजत्यपि ॥१५॥ स्वभा-
वाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः । अभियोगे च साक्ष्ये वा दुष्टः सः परिकीर्तितः ॥१६॥
संदिग्धार्थं स्वतंत्रो यः साधयेद्यस्तु निष्पतेत् । न चाहूतो वदेद्यश्च हीनो वध्यश्च नो संस्मृ- २३
तः ॥१७॥ साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः ॥१८॥ पूर्वपक्षेऽधरीभूते भवेयुरुत्त-
रवादिनः । स पराजित्य वादस्मात् तद्धीनं तु दापयेत् ॥१९॥ दत्तं च स्वपराभ्यां चैव धानिने

गाद्बहिः शत्रुकृतास्तथा ॥२२॥ मत्तोन्मत्तार्त्तव्यसनिबालभीतादियोजनः । असंबद्ध-
कृतश्चैव व्यवहारो न सिध्यति ॥२३॥ प्रनष्टाधिगतं देयं नृपेण धनिने धनं । विभावयेन्न
चेल्लिङ्गैस्तत्समं दण्डमर्हति ॥२४॥ राजा लब्ध्वा निधिं दद्याद्द्विजेभ्योऽर्द्धं द्विजः पुनः । विद्वा-
नशेषमाददीत स सर्वस्य प्रभुर्यतः ॥२५॥ इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत् । अनि-
वेदितविज्ञातो दाप्यस्तं दण्डमेव च ॥२६॥ देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु ॥ अदद-
द्धि समाप्नोति किल्बिषं यस्य तस्य तत् ॥२७॥ अशीतिभागो वृद्धिः स्यात् मासि मासि सबन्ध-
के । वर्णक्रमाच्छतं द्वित्रिचतुष्पञ्चकमन्यथा ॥२८॥ कान्तारगास्तु दशकं सामुद्रा विंशकं शतं

(25)

दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु ॥३९॥ संततिस्तु पशुस्त्रीणां रसस्याष्टगुणाः पराः । व
स्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणाः स्मृताः ॥४०॥ प्रसन्नं साधयन्नर्थं न वाच्यो नृपतेर्भ
वेत् । साध्यमानो नृपं गच्छेद् दंड्यो दाप्यश्च तद्धनं ॥४१॥ गृहीतानुक्रमाद्दाप्यो धनिनाम
धमर्णिकः । दत्वा तु ब्राह्मणायैव नृपतिस्तदनंतरं ॥४२॥ राज्ञाधमर्णिको दाप्यः साधिताद्द २५
शकं शतं । पंचकं शतकं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः ॥४३॥ हीनजातिं परिक्षीणमृणा
र्थं कर्म कारयेत् । ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयं ॥४४॥ दीयमानं न गृह्णा

ति प्रयुक्तं यः स्वकं धनं । मध्यस्थस्थापितं तत्स्याद्वर्धते न ततः परं ॥४५॥ अविभक्तैः कुटुं
बार्थे यदृणं तु कृतं भवेत् । दद्यादृते कुटुंबार्थान्न पतिः स्त्रीकृतं तथा ॥ दद्युस्तद्रिक्थिनः प्रोषिते
वा कुटुंबिनि ॥४६॥ न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता । दद्यादृते कुटुंबार्थान्न पतिः
स्त्रीकृतं तथा ॥४७॥ सुराकामद्यूतकृतं दंडशुल्कावशिष्टकं । वृथादानं तथैवेह पुत्रो दद्यान्न पै
त्रिकं ॥४८॥ गोपशौंडिकशैलूषरजकव्याधयोषितां । ऋणं दद्यात्पतिस्तेषां यस्माद्वृत्तिस्त
दाश्रया ॥४९॥ प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतं । स्वयंकृतं वा यदृणं नान्यस्त्री दातु
मर्हति ॥५०॥ पितरि प्रोषिते प्रेते व्यसनाभिप्लुते पि वा । पुत्रपौत्रैरृणं देयं निह्नवे साक्षिभा

Indira Gandhi National Centre for the Arts

वितं ॥५१॥ स्वच्छंमाह-स्वादीयोगो ॥ कुर्याद्दत्तानैव च ॥ पुत्रो नन्यापितद्रव्यः पुत्रो हीन
स्यात् क्विंनः ॥५२॥ चारराामयदर्प त्योः पितुः पुत्रस्य बिवदि ॥ प्रातिनाव्यमृणां
साक्ष्यमविन्नतानुस्मृतं । दर्शने प्रत्ययेदाने प्रातिनाव्यं विधीयते । आद्यौ तु वि
तथेदाप्यावितस्य सुता अपि ॥५४॥ दर्शने प्रातिभूर्यत्र मृतः प्रात्ययिकोपि वा । न त ॥ २६
त्पुत्रा सर्वमृणं दातयसास्कृतः ॥५५॥ बहवः स्युर्यदि स्वांशैर्दद्युः प्रातिभु
वं धनं । एकच्छायाश्रिते ह्येषु धनिकस्य यथा रुचिः ॥५६॥ प्रातिभूर्दापितो यस्तु प्रका

प्रकाशं धनिनेधनं । द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भनं ॥) द्भवेत् ॥५७॥ संतति स्त्री पशु बु
व धान्य त्रिगुणमेव च । वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्टगुणास्तथा ॥५८॥ आदिप्रणोस्ये द्वि
गोधलिवदिनमोकाति । काले कालकृतो नश्येत्फलं नोऽपेनन श्याति ॥५९॥ गोपाद्विनोगोनो
वृद्धिः सोपकारेचह्रापिति । न ष्टोदेयेविनष्टश्च दैवराजकृताहृतिः ॥६०॥ आद्यः स्वीकरणात्सि
द्धिरक्षमानोधसारतः ॥ जातश्चेन्यद आधिर्बोधनर्क्षे नाप्ताजनीनवेत् ॥ ६१॥ चरित्रवंधककृ
तं सवृध्या दायबेद्धनं । सत्यकारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् ॥६२॥ उपस्थितस्य मोक्ष्य

Indira Gandhi National
Centre for the Arts

२८

आधिस्तेनोन्यथा भवेत्। प्रयोजके सति धनं कुलेन्यस्याधिमाप्नुयात्॥६३॥ तत्कालकृत
मूल्यो वा तत्र तिष्ठेदवृद्धिकः। विना धारणकाद्वापि विक्रीणीत ससाक्षिकं॥६४॥ यदा तु
द्विगुणीभूतमृणमाधौ तदा खलु। मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने॥६५॥ ३१
इति ऋणादानप्रकरणं॥ वासनस्थमनाख्याय हस्तेन्यस्य यदर्प्यते। द्रव्यं तदौपनि
धिकं प्रतिदेयं तथैव तत्॥१॥ न दाप्योपहृतं तत्तु राजदैविकतस्करैः॥ ग्रेषश्चेन्मार्गिते
दत्ते दाप्यो दंडश्च तत्समं॥२॥ आजीवन्स्वेच्छया दंड्यो दाप्यस्तं चापि सोदयं। याचितान्वा

हितन्यासनिक्षेपादिष्वयं विधिः॥ इति निक्षेपप्रकरणं॥ वासनस्थमनाख्याय हस्तेन्यस्य य
दर्प्यते। द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तत्। दानशीलाः कुलीनाः सत्यवादिनः। धर्मप्रधा
नाः सज्जवः पुत्रवंतो धनान्विताः॥१॥ त्र्यवरासाक्षिणो ज्ञेयाः श्रौतस्मार्तक्रियापराः। यथाजाति
यथावर्णं सर्वे सर्वेषु वा स्मृताः॥२॥ स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः। रंगावतारिपाषंडि
कूटकृद्विकलेंद्रियाः॥३॥ पतिताप्तार्थसंबंधिसहायरिपुतस्कराः॥ साहसी दृष्टदोषश्च नि
र्धूताद्यास्त्वसाक्षिणः॥४॥ उभयानुमतः साक्षी भवत्येकोपि धर्मवित्॥ सर्वः साक्षी संग्रहणे

Indira Gandhi National Centre for the Arts

चौर्यपारुष्यसाहसे ।५॥ साक्षिणः श्रावयेद्वादिप्रतीवादीसमीपगान् । येपातककृतां लोका म
हापातकिनां तथा ॥६॥ अग्निदानां च ये लोका ये च स्त्रीबालघातिनां । स तान्सर्वानवाप्नोति यः
साक्ष्यमनृतं वदेत् ॥७॥ सुकृतं यत्त्वया किंचिज्जन्मांतरशतैः कृतं । तत्सर्वं तस्य जानीहि यं परा
जयसे मृषा ॥८॥ अब्रुवन्हि नरः साक्ष्यं मृणः सदृशबंधने । राज्ञा सर्वं प्रदाप्यः स्यात् षट्चत्वारिं
शके ऽहनि ॥९॥ न ददाति हि यः साक्ष्यं जानन्नपि नराधमः ॥ स कूटसाक्षिणां पापैस्तुल्यो
दंडेन चैव हि ॥१०॥ द्वैधे बहूनां वचनं समेषु गुणिनां तथा । गुणिद्वैधे तु वचनं ग्राह्यं ये



गुणवत्तमा ॥११॥ यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत् । अन्यथावादिनो यस्य ध्रु
वस्तस्य पराजयः ॥१२॥ उक्तेपि साक्षिभिर्यद्यन्ये गुणवत्तमाः ॥ द्विगुणा वान्यथा ब्रूयुः
कूटाः स्युः पूर्वसाक्षिणः ॥१३॥ पृथक्पृथग्दंडनीयाः कूटकृत्साक्षिणस्तथा ॥ विवादाद्द्वि
गुणं दंडं विवास्यो ब्राह्मणः स्मृतः ॥१४॥ यः साक्ष्यं श्रावितो न्येभ्यो निह्नुते तत्तमोवृतः । स
दाप्योष्टगुणं दंडं ब्राह्मणं तु विवासयेत् ॥१५॥ वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् ॥
तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः ॥१६॥ इति साक्षिप्रकरणं ॥ यः कश्चिद्द्वयोर्नि

Indira Gandhi National Centre for the Arts

२०

श्रीनुः स्वरूपान्तरस्य च ॥ लेख्यं तु साक्षिकस्यामत्कार्यं तस्मिन् धानिकपूर्वकः ॥१॥ समामासत
द्वार्द्धाहर्नामजातिस्वगोत्रकैः ॥ सब्रह्मचारिकात्मीयपित्रोपरि लेखितः ॥२॥ ऋणदृ णामादि चि
ह्नितं ॥२॥ समाप्तेर्थे रुपी णाम स्वहस्तेन निवेशयेत् । मतं मे मुकपुत्रस्य यदत्रोपरि लेखितं ॥
॥३॥ साक्षिणश्च स्वहस्तेन पितृनामपूर्वकं । अत्राहममुकसाक्षी लेखयेयुरिति ते समाः ॥
४॥ उभयाभ्यर्थितेनेत्थं मया ह्यमुकसूनुना । लिखितं ह्यमुकेनेति लेखको तेततो लिखे
त ॥५॥ विनापि साक्षिभिर्लेख्यं स्वहस्तालिखितं यत् । तत्प्रमाणं स्मृतं सर्व्वं बलोपधिकृत

२९

॥ ५६

र्णाः समांशकाः । नदत्तं स्त्रीधनं यासां न ता वा स्व सुवेराव ॥२॥ शक्रस्यानीह मानस्य ! कोच
द्वापृथक्स्त्रियं । न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृतः ॥३॥ विभजेरंसुताः पि
त्रोरूर्द्ध्वं मृच्छमृणं समं । मातुर्दुहितरः शेषमृणात्ताभ्य ऋते न्वयः ॥४॥ पितृद्रव्याविरोधे
न यदन्यत्स्वयमर्जितः । मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत् ॥५॥ क्रमादभ्यागतं द्रव्यं ह्
तमभ्युद्धरेत्तु यः ॥ दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च ॥६॥ सामान्यार्थे समुत्थानविभागो
पि समः स्मृतः । अनेकपितृकाणां तु पितृतो भागकल्पना ॥७॥ भूर्या पितामहोपात्ता निर्बंधो

१२

(३१)

द्रव्यमेव वा । तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चैव हि ॥८॥ विभक्तेषु सुतो जातः सवर्णायां वि
भागभाक् । दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात् ॥९॥ पितृभ्यां यस्य यद्दत्तं तत्तस्यैव
धनं भवेत् । पितुरूर्द्धं विभजतां माताप्यंशं समं हरेत् ॥१०॥ असंस्कृतास्तु संस्कार्या भ्रातृ ४२
भिः पूर्वसंस्कृतैः । भगिन्यश्च निजादंशाद्दत्त्वांशं तु तुरीयकं ॥११॥ चतुस्त्रिद्व्येकभागास्युर्व
र्णशो ब्राह्मणात्मजाः । क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः ॥१२॥ अन्योन्यापः
हृतं द्रव्यं विभक्तैर्यत्र दृश्यते । तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः ॥१३॥ अपुत्रे

णापरक्षेत्रे नियोगोत्पादितः सुतः । उभयोरप्यसौ पिंडदाता च धर्मतः ॥१४॥ औरसो धर्मपत्नीजस्त
त्समः पुत्रिकासुतः । क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥१५॥ गृहे प्रछन्न उत्पन्नो गूढजस्तु
सुतः स्मृतः । कानीनः कन्यकाजातः मातामहसुतो मतः ॥१६॥ अक्षतायां क्षतायां वा जातः पुन
र्भवः सुतः । दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् ॥१७॥ क्रीतश्च ताभ्यां विक्रीतः कृत्रि
मः स्यात्स्वयं कृतः । दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः ॥१८॥ उत्सृष्टो गृह्यते यस्तु
सोपविद्धो भवेत्सुतः । पिंडदोंशहरस्तेषां पूर्वाभावे परः परः ॥१९॥ सजातीयेष्वयं प्रोक्त

Indira Gandhi National Centre for the Arts

(३२)

स्तनयेषु मया विभागः। जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत् ॥२०॥ मृते पितरि कुर्युस्तं भ्रातर
स्त्वर्द्धभागिनं ॥ अभ्रातृको हरेत् सर्वं दुहितॄणां सुता द्दति ॥२१॥ पत्नी दुहितरश्चैव पितरौ भ्रात
रस्तथा। तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः ॥२२॥ एषामभावे पूर्वस्य धनभागुत्त
रोत्तरः। स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः ॥२३॥ वानप्रस्थयतिब्रह्मचारिणामृक्थ
भागिनः। क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः ॥२४॥ संसृष्टिनस्तु संसृष्टी सोदरस्य च
सो। दद्याच्चापहरेच्चांशं जातस्य च मृतस्य च ॥२५॥ अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरे
त्। असंसृष्ट्यपि वादद्यात् संसृष्टो नान्यमातृजः ॥२६॥ क्लीवोऽथ पतितस्त यः पङ्गुरुन्मत्त 43

कोजडः। अन्धोऽचिकित्स्यरोगाद्या भर्त्तव्याः स्युर्निरंशकाः ॥२७॥ औरसाः क्षेत्रजास्त्वेषां निर्दोषा भाग
हारिणः। सुताश्चैषां प्रभर्त्तव्या यावद्वै भर्तृसात्कृताः ॥२८॥ अपुत्रा योषितश्चैषां भर्त्तव्याः साधु
वृत्तयः। निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च ॥३९॥ पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतं
। आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्त्तितं ॥४०॥ बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च। अप्रजाया
मतीतायां बान्धवास्तदवाप्नुयुः ॥४१॥ अप्रजस्त्रीधनं भर्त्तु ब्राह्मादिषु चतुर्ष्वपि। दुहितॄणां प्रसूता
चेत् शेषेषु पितृगामि तत् ॥४२॥ दत्वा कन्यां हरन् दण्ड्यो व्ययं दद्याच्च सोदयं। मृतायां सेवमादद्याधाभिवे
दनिकः समं। न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकीर्त्तितं ॥२५॥ विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिले
परिशोध्योभयव्ययं ॥२२॥ दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके। गृहीतं स्त्रीधनं भर्त्ता नाकामो दातुमर्हति ॥२४॥
आधिविन्नस्त्रियै २

Indira Gandhi National Centre for the Arts

(३३)

खितैः ॥ विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः ॥२६॥ इति विभागप्रकरणं ॥ सीम्नो विवादे क्षेत्रस्य
सामंताः स्थविरादयः ॥ गोपाः सीमाकृषाणा ये सर्वे च वनगोचराः ॥१॥ नयेयुरेते सीमानं स्थलांगार
तुषद्रुमैः ॥ सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षितां ॥२॥ सामंता वा समग्रामाश्चत्वारोष्टौ दश वा
पि वा । रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणं ॥३॥ अनृतेषु पृथग्दंड्या राज्ञा मध्यमसाह ४४
सं ॥ अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्तिता ॥४॥ आरामायतनग्रामनिपानोद्यानवेश्मसु ४५
। एष एव विधिर्ज्ञेयो वर्षांबुप्रवहादिषु ॥५॥ मर्यादायाः मर्यादायाः प्रभेदे तु सीमातिक्रमणे त
था । क्षेत्रस्य हरणे दंडा अधमोत्तममध्यमाः ॥६॥ न निषेध्योल्पबाधस्तु सेतुः कल्याणकारकः ।

परभूमिं हरन्नल्पधः स्वल्पक्षेत्रो बहूदकः ॥७॥ स्वामिने यो निवेद्यैव क्षेत्रे सेतुं प्रवर्तयेत् । उ
त्पन्ने स्वामिनो भोगस्तदभावे महीपतेः ॥८॥ फालाहतमपि क्षेत्रं यो न कुर्यान्न कारयेत् । स
प्रदाप्यः कृष्टफलं क्षेत्रमन्येन कारयेत् ॥९॥ इति सीमाविभागप्रकरणं ॥ माषानष्टौ तु म
हिषी सस्यघातस्य कारिणी । दंडनीया तदर्द्धं तु गौस्तदर्द्धमजाविकं ॥१॥ भक्षयित्वोप
विष्टानां यथोक्ताद्द्विगुणो दमः ॥ सममेषां विवीतेपि खरोष्ट्रं महिषीसमः ॥२॥ यावत्स
स्यं विनश्येत तावत्स्यात्क्षेत्रिणः फलं । पालस्ताड्यस्तु गोस्वामी पूर्वोक्तं दं

Indira Gandhi National
Centre for the Arts

दण्ड महीति ॥३॥ पालिग्रामे विवीतान्ते क्षेत्रे दोषो न विद्यते । अकामतः कामचारे चोरवद्दण्ड
महीति ॥४॥ महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः । पालो येषां न तु मता मोच्या दैवराजप
रिप्लुताः ॥५॥ यथार्पितान् पशून् प्रातः सायं प्रत्यर्पयेत्तथा । प्रमादान्मृतनष्टांश्च प्रदाप्यः कृतवेत
नः ॥६॥ पालदोषविनाशे तु पाले दंडो विधीयते । अर्द्धत्रयोदशपणः स्वामिनो द्रव्यमेव च ॥७॥ ४५
ग्रामेच्छया गोप्रचारो भूमिराजवशेन वा ॥ द्विजस्तृणैधः पुष्पाणि सर्वतः स्ववदाहरेत् ॥८॥ ध
नुःशतं परिणाहो ग्रामक्षेत्रान्तरं भवेत् । द्वे शते कर्वटस्य स्यात् नगरस्य चतुःशतं ॥९॥
श्रुतः ॥ इति पालविवादप्रकरणं ॥ स्वं लभेतान्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते । हीनाद्रहो

हीनमूल्ये वेलाहीने च तस्करः ॥१॥ नष्टापहृतमासाद्य हर्तारं ग्राहयेन्नरं । देशकालातिपत्तौ च
गृहीत्वा स्वयमर्पयेत् ॥२॥ विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमं । क्रेता मूल्यमवाप्नोति
तस्माद्यस्तस्य विक्रयी ॥३॥ आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा ॥ पंचबंधो दमस्तस्य रा
ज्ञे तेनाविभाविते ॥४॥ हृतं प्रनष्टं यद्द्रव्यं परहस्तादमाहृतः । अर्वाक् संवत्सरात् स्वामी
हरेत परतो नृपः ॥६॥ पणानेकशफे दद्याच्चतुरः पंच मानुषे । महिषोष्ट्रगवां द्वौ द्वौ पादं पाद
मजाविके ॥७॥ इति स्वामिविक्रयप्रकरणं ॥ वापुयात । अनिवेद्य नृपे दण्ड्यः सप्त पण्यांशवाति प
शान् ॥५॥ शौल्किकैः स्थानपालैर्वा नष्टापहृत ॥ स्व कुटुंबाविरोधेन देयं दारसुतादृते । नान्व
ये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतं ॥१॥ प्रतिग्रहः प्रकाशः स्यात् स्थावरस्य विशेषतः । देयं प्र

Indira Gandhi National Centre for the Arts

तिश्रुतं चैव दत्त्वा नापहरेत्पुनः ॥२॥ इति दत्ताप्रदानिकप्रकरणं ॥ दशैकपंचसप्ताहत्र्यहार्द्धमासिकं । बीजा
योवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणं ॥१॥ अग्नौ सुवर्णमक्षीणं रजते द्विपलं शते । अष्टौ त्र
पुणि सीसे च ताम्रे पंच दशायसि ॥२॥ शते दशपला वृद्धिरौर्णे कार्पासिके तथा । मध्ये पंचपला सूत्रे
सूक्ष्मे तु त्रिपला मताः ॥३॥ कार्मिके रोमबद्धे च त्रिंशद्भागः क्षयो मतः । न क्षयो न च वृद्धिश्च
कौषेयवल्कलेषु च ॥४॥ देशं कालं च योगं च ज्ञात्वा नष्टे बलाबलं । द्रव्याणां कुशला ब्रूयुः यत्तद्दाप्य 46
मसंशयः ॥५॥ इति क्रीतानुशयप्रकरणं ॥ बलान्नासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते । स्वामि
प्राणप्रदो भक्तत्यागात्तन्निष्क्रियादपि ॥१॥ प्रव्रज्यावसितो राज्ञो दास आमरणांतिकः । वर्णानामानुलोम्ये
न दास्यं न प्रतिलोमतः ॥२॥ कृतशिल्पोपि निवसेत्कृतकालं गुरोर्गृहे । अंतेवासी गुरुप्राप्तभोजन

स्तत्फलप्रदः ॥२॥ राजा कृत्वा पुरे स्थानं ब्राह्मणान्न्यस्य तत्र तु । त्रैविद्यं वृत्तिमद्ब्रूयात्स्वधर्मः पाल्यता
मपि । निजधर्माविरोधेन यस्तु सामयिको भवेत् । सोपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः ॥५॥ ग
णद्रव्यं हरेद्यस्तु संविदं लंघयेच्च यः । सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत् ॥६॥ कर्तव्यं वच
नं सर्वैः समूहहितवादिनां ॥ यस्तत्र विपरीतः स्यात् स दाप्यः प्रथमं दमं ॥७॥ समूहकार्या
यातान् कृतकार्यान्विसर्जयेत् । सदानमानसत्कारैः पूजयित्वा महीपतिः ॥८॥ समूहकार्यप्रहितो य
ल्लभेत तदर्पयेत् ॥ एकादशगुणं दाप्यो यद्यसौ नार्पयेत्स्वयं ॥९॥ धर्मज्ञाः शुचयोलुब्धा भवेयुः का
र्यचिंतकाः । कर्तव्यं वचनं तेषां समूहहितवादिनां ॥१०॥ श्रेणिनैगमपाषंडिगणानामप्ययं विधिः
॥ भेदं चैषां नृपो रक्षेत् पूर्ववृत्तिं च पालयेत् ॥११॥ इति संविद्व्यतिक्रमप्रकरणं ॥ गृहीतवेतनः कर्म

Indira Gandhi National
Centre for the Arts

त्यजनद्विगुणमाप्नुयात्। अगृहीते समं दाप्यो भृत्यै रक्ष्य उपस्करः ॥१॥ दाप्यस्तु दशमं भागं वाणिज्यपशुस
स्यतः। अनिश्चित्य भृतिं यस्तु कारयेत्स महीक्षिता ॥२॥ देशकालं च योऽतीयात् लाभं कुर्याच्च योऽन्यथा।
तत्र स्यात्स्वामिनश्छंदो ऽधिकं देयं कृतेऽधिके ॥३॥ यो यावत्कुरुते कर्म तावत्तस्य तु वेतनं। उभयो
रप्यसाध्यं चेत्साध्ये कुर्याद्यथा श्रुतं ॥४॥ अराजदैविकं नष्टं भांडं दाप्यस्तु वाहकः। प्रस्थानविघ्न
कृच्चैव प्रदाप्यो द्विगुणां भृतिं ॥५॥ प्रक्रांते सप्तमं भागं चतुर्थं पथि संत्यजन्। भृतिमर्द्धपथे सर्वां प्रदाप्य 47
स्त्याजकोऽपि वा ॥६॥ इति वेतनादानप्रकरणं॥ ग्लहे शतिकवृद्धेस्तु सभिकः पंचमं शतं। गृह्णीयाद्धूर्त
कितवादितराद्दशकं शतं ॥१॥ स सम्यक्पालितो दद्याद्राज्ञे भागं यथाकृतं। जितमुद्ग्राहयेज्जेत्रे दद्या
त्सत्यं वचः क्षमी ॥२॥ प्राप्ते नृपतिना भागे प्रसिद्धे धूर्तमंडले। जितं ससभिके स्थाने दापये

न्यथा न तु ॥३॥ द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हि। राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपधि
देविनः ॥४॥ द्यूतमेकमुखं कार्यं तस्करज्ञानकारणात्॥ सत्यासत्यान्यथास्तोत्रैर्न्यूनांगेंद्रियरो
गिणां। क्षेपं करोति चेद्दंड्यः पणानर्द्धत्रयोदश ॥१॥ अभिगंतास्मि भगिनीं मातरं वा तवेति च। श
पंतं दापयेद्राजा पंचविंशतिकं दमं ॥२॥ अर्द्धोऽधमेषु द्विगुणः परस्त्रीषूत्तमेषु च। दंडप्रणयनं कार्यं
वर्णजात्युत्तराधरैः ॥३॥ प्रातिलोम्यापवादेषु द्विगुणत्रिगुणा दमाः। वर्णानामानुलोम्येन तस्मादेवा
र्द्धहानितः ॥४॥ बाहुग्रीवानेत्रसक्थिविनाशे वाचिके दमः। शत्यस्तदर्द्धिकः पादनासाकर्णकरादिषु
॥५॥ अशक्तस्तु वदन्नेवं दंडनीयः पणान्दश। तथा शक्तः प्रतिभुवं दाप्यः क्षेमाय तस्य तु ॥६॥ पत

Indira Gandhi National
Centre for the Arts.

३७

नीचैकृते क्षेपे दंडो मध्यमसाहसः। उपपातकयुक्ते तु दाप्यः प्रथमसाहसं ॥१०॥ त्रैविद्यनृपदेवानां क्षे
पउत्तमसाहसः। मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोः ॥११॥ इतिवाक्पारुष्यप्रकरणं ॥
असाक्षिकहते चिह्नैर्युक्तिभिश्चागमेन तु। द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृताद्भयात् ॥१॥ भ
स्मपंकरजःस्पर्शे दंडो दशपणः स्मृतः। अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणस्ततः ॥२॥ समेष्वे ४८
वं परस्त्रीषु द्विगुणस्तूत्तमेषु च। हीनेष्वर्द्धदमो मोहमदादिभिरदंडनं ॥३॥ विप्रपीडाकरं
छेद्यमंगमब्राह्मणस्य तु। उद्गूर्णे प्रथमो दंडः संस्पर्शे तु तदर्द्धिकः ॥४॥ उद्गूर्णे हस्तपादे
तु दशविंशतिकौ दमौ। परस्परं च सर्वेषां शस्त्रे मध्यमसाहसः ॥५॥ पादकेशांशुककरलुं

लुंचनेषु पणान्दश ॥ पीडाकर्षांशुकावेष्टपादाध्यासे शतं दमः ॥६॥ शोणितेन विना दुःखं कुर्वन्
काष्ठादिभिर्नरः। द्वात्रिंशतं पणान् दाप्यो द्विगुणं दर्शनेसृजः ॥७॥ करपाददतो भंगे छेदने कर्ण
नाशयोः। मध्यो दंडो व्रणोद्भेदे मृतकल्पहते तथा ॥८॥ चेष्टाभोजनवाग्रोधे नेत्रादिप्रतिभेदने
कंधराबाहुसक्थ्नां च भंगे मध्यमसाहसः ॥९॥ एकं घ्नतां बहूनां तु यथोक्ताद्द्विगुणो दमः ॥ कल
हापहृतं देयं दंडश्च द्विगुणः स्मृतः ॥१०॥ दुःखमुत्पादयेद्यस्तु स समुत्थानजं व्ययं। दाप्यो दंडं च यो यस्मिन् कलहे समुदाहृतः ॥११॥ अभिघाते तथा छेदे भेदे कु
ड्यावपातने ॥ पणान्दाप्यः पंचदशविंशतायतथा ॥१२॥ दुःखोत्पादि गृहे द्रव्यं क्षिपन्प्राणहरं तु

३८ था। षोडशाद्यः पणान् दाप्यो द्वितीयो मध्यमं दमं॥१३॥ दुःखे च शोणितोत्पादे शाखाङ्गच्छेदने तथा

दंडः क्षुद्रपशूनां स्याद्द्विपणप्रभृतिः क्रमात्॥१४॥ लिंगस्य छेदने मृत्यौ मध्यमो मूल्यमेव च। म ४८

हापशूनामेतेषु स्थानेषु द्विगुणो दमः॥१५॥ चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये।

। जातद्रुमाणां द्विगुणो दमो वृक्षेऽथ विश्रुते॥१६॥ गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधां।

धां पूर्वस्मृतादर्द्धदंडः स्थानेषूक्तेषु कर्त्तने॥१७॥ इति पारुष्यप्रकरणं॥ सामान्यद्रव्यप्र

सभहरणात्साहसं स्मृतं। तन्मूल्याद्द्विगुणो दंडो निह्नवे तु चतुर्गुणः॥१॥ यः साहसं कार

का[illegible] दाप्यो द्विगुणं दमः। यश्चैवमुक्त्वाहं दाता कारयेत्स चतुर्गुणं॥२॥ अर्घ्याक्रोशातिक्रम

कृ[illegible]हारदः॥ संदिष्टस्याप्रदाता च समुद्रगृहभेदकृत्॥३॥ सामंतकुलिकादीनामपका

रस्य कारकः। पंचाशत्पणिको दंड एषामिति विनिश्चयः॥४॥ स्वच्छंददासिविधवागामी विक्रुष्टेनभि

धावकः। अकारणे च विक्रोष्टा चंडालश्चोत्तमान्स्पृशेत्॥५॥ शूद्रः प्रव्रजितानां च दैवे पित्र्ये च

भोजकः। अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत्॥६॥ वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकृत्। साधा

रणस्यापलापी दासीगर्भविनाशकृत्॥७॥ पितृपुत्रस्वसृभ्रातृदंपत्याचार्यशिष्यकाः। एषामप

तितान्योन्यत्यागी च शतदंडभाक्॥८॥ इति साहसप्रकरणं॥ ०॥ वसानस्त्रीन्पणान्दंड्यो नेजकस्तु

परांशुकं। विक्रयावक्रयाधानयाचितेषु पणान्दश॥१॥ पितापुत्रविरोधे तु साक्षिणां त्रिपणो दमः। अं

तरे च तयोर्यः स्यात्तस्याप्यष्टगुणो दमः॥२॥ तुलाशासनमानानां कूटकृन्नाणकस्य च। एभिश्च

Indira Gandhi National Centre for the Arts

(३९)

व्यवहर्तार्थः सदा प्रोक्त उत्तमम् ॥२॥ अकूटं कूटकं ब्रूते कूटं यस्साप्यकूटकं । स नाणकपरीक्षी तु दाप्य
उत्तमसाहसं ॥४॥ भिषग्मिथ्याचरन् दाप्यस्तिर्यक्षु प्रथमं दमं ॥ मानुषे मध्यमं राजमानुषेषू
त्तमं तथा ॥५॥ अबद्धं यश्च बध्नाति बद्धं यश्च प्रमुंचति । अप्राप्तव्यवहारं च स दाप्यो दममुत्तमं ।
॥६॥ मानेन तुलया वापि योंशमष्टमकं हरेत् । दंडं स दाप्यो द्विशतं वृद्धौ हानौ च कल्पितं ॥७॥
भेषजस्नेहलवणगंधधान्यगुडादिषु । पण्येषु प्रक्षिपन् हीनं पणान् दाप्यस्तु षोडश ॥८॥ मृ
च्चर्ममणिसूत्रायःकाष्ठवल्कलवाससां । अजातौ जातिकरणे विक्रेयाष्टगुणो दमः ॥९॥ समु ५०
द्रपरिवर्तं च सारभांडं च कृत्रिमं । आधानं विक्रयं वापि नयतो दंडकल्पना ॥१०॥ भिन्ने प
णे तु पंचाशत्पणे तु शतमुच्यते । वणि द्विशतो दंडो मूल्यवृद्धौ च वृद्धिमान ॥ ११॥ संभूय कुर्व

तां मर्घं सबाधं कारुशिल्पिनां । अर्थस्य ह्रासं वृद्धिं वा साहस्रो दंड उच्यते ॥१२॥ संभूय वणिजां पण्यमनर्घे
णोपरुंधतां । विक्रीणतां वा विहितो दंड उत्तमसाहसः ॥१३॥ राजनि स्थाप्यते योऽर्घः प्रत्यहं तेन
विक्रयः ॥ क्रयो वा निस्रवस्तस्माद्वणिजां लाभकृत्स्मृतः ॥१४॥ स्वदेशपण्ये तु शतं वणिग्गृह्णीत पंचकं ॥
दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी ॥१५॥ पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवं । अर्घोनुग्रह
कृत्कार्यः क्रेतुर्विक्रेतुरेव च ॥१६॥ गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति । सोदयं तस्य दाप्योसौ दिग्ला
भं वा दिगागतिः ॥१७॥ विक्रीतमपि विक्रेयं पूर्वे क्रेतर्यगृह्णति । हानिश्चेत्क्रेतृदोषेण क्रेतुरेव हि सा
भवेत् ॥१८॥ राजदैवोपघातेन पण्ये दोषमुपागते । हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः ॥१९॥ अन्य
हस्ते तु विक्रीतं दुष्टं वा दुष्टवद्यदि । विक्रीणीते दमस्तत्र मूल्यात्तु द्विगुणो भवेत् ॥२०॥ वृद्धिक्षयौ च वणिजां प

Indira Gandhi National
Centre for the Arts

(४०)

पराधीनामविजानतां। क्रीत्वानानुशयः कार्य्यः कुर्वन् षड्भागदंडभाक् ॥२१॥ इति विक्रयासंप्रदानप्रकरणं
॥ समवायेन वणिजां लाभार्थं कर्म्म कुर्वतां ॥ लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ ॥१॥ प्रतिषिद्धमना-
दिष्टं प्रमादाद्यच्च नाशितं। स तद्दद्याद्विप्लवाच्च रक्षिताद्दशमांशभाक् ॥२॥ अर्घप्रक्षेपणाद्विंशं भागं शुल्कं
नृपो हरेत्। व्यासिद्धं राजयोग्यं च विक्रीतं राजगामि तत् ॥३॥ मिथ्यावदन् परीमाणं शुल्कस्थानादपास- ५१
रन्। दाप्यस्त्वष्टगुणं यश्च सव्याजक्रयविक्रयी ॥४॥ तरिकः स्थलजं शुल्कं गृह्णन् दाप्यः पणान् दश॥
ब्राह्मणाः प्रतिवेश्यानामेतद्देवानिमंत्रणे ॥५॥ देशांतरगते प्रेते द्रव्यं दायादबांधवाः। ज्ञातयो वा हरे-
युस्तदागतास्तैर्विना नृपः ॥६॥ जिह्मं त्यजेयुर्निर्लाभमशक्तोऽन्येन कारयेत्। अनेन विधिराख्यात ऋ-

त्विक्कर्षककर्म्मिणां ॥७॥ इति संभूयसमुत्थानप्रकरणं ॥ ग्राहकैर्गृह्यते चौरो लोप्त्रेणाथ पदेन वा।
पूर्वकर्मापराधी च तथा वाऽशुद्धवासकः ॥१॥ अन्येऽपि शंकया ग्राह्या जातिनामादिनिह्नवे। द्यूत-
स्त्रीपानसक्ताश्च शुष्कभिन्नमुखस्वराः ॥२॥ परद्रव्यगृहाणां च पृच्छका गूढचारिणः। निरा-
यव्ययवन्तश्च विनष्टद्रव्यविक्रयः ॥३॥ गृहीतः शंकया चौर्ये नात्मानं चेद्विशोधयेत्। दापयित्वा हृ-
तं सर्वं चौरं दंडेन दंडयेत् ॥४॥ चौरप्रदापापहृतं घातयेद्विविधैर्वधैः॥ सचिह्नं ब्राह्मणं
कृत्वा स्वराष्ट्राद्विप्रवासयेत् ॥५॥ घातितेऽपहृते दोषो ग्रामभर्तुरनिर्गते। विवीतभर्तुस्तु पथि
चौरोद्धर्तुरवीतके ॥६॥ स्वसीम्नि दद्याद्ग्रामस्तु पदं वा यत्र गच्छति। पंचग्रामी बहिः क्रोशाद्दश

Indira Gandhi National
Centre for the Arts

५१

ग्राम्यपशवा पुनः ॥७॥ वृं दिग्माहांस्तथा ग्राम्यकुंतवारांश्च हारिणः । प्रसह्य घातिनश्चैव शूलाना

रोपयेन्नरां ॥८॥ उत्कृष्टं वा कर्म च यो नरो कारयेत् सदशं हीनकी । कार्षो द्वितीयसाहसो करपादैकहीन

को ॥९॥ द्रव्यमध्यं महाद्रव्यं इवणोसारतो दमः । देशकालौ वयः शक्तिं संचिंत्य दंडकर्म्मि

णि ॥१०॥ नक्तावकाशप्रमादकर्मं चोपकरणांश्च यातं ॥ वधश्चैव स्वप्रहर्तुर्वा ज्ञानतो दंडउत्तमः ५२

॥११॥ शस्त्रावपातेन निस्यपातने चोत्तमो दमः । उत्तमो वाधमो वापि पुरुष स्त्री प्रमापणो ॥१२

विप्रदुष्टां स्त्रियं चैव पुरुषघ्नीमगर्भिणीं ॥ सेतुभेदकरीं चाप्सु शिलां बध्वा प्रवेशयेत् ॥१३॥ वि

षाग्नि[illegible] पतिगुरुनिजापत्यप्रमापिणीं । विकर्णकरनासौष्ठीं कृत्वा गोभिः प्रवासयेत् । अविज्ञा

---

[illegible]हतस्याशु कलत्रं सुतबांधवाः । ब्रह्मघ्नाश्चोषितश्चास्य परपुंस्त्रवताः पृथक् ॥१५॥ स्त्रीद्रव्यावृत्ति

कामो वा केन वा यीगतः सह । मृत्युदेशसमासन्नं पृष्टं ह्यापि जनेः शनैः ॥१६॥ द्रव्यवश्चावन विवी

तखलदाहकः । राजपत्न्यभिगामी च दाधव्याः कटकाग्निना ॥१७॥ इति स्तेयप्रकरणं ॥ पुमान्सं

गृहते ग्राह्यः केशाकेशि परस्त्रियां । सद्यो वा कामजैश्चिह्नैः प्रतिपन्नो द्वयोस्तथा ॥१॥ नीवीस्तन

प्रावरणसक्थिकेशावमर्शनं । अदेशकालसंभाषं सहैकस्थानमेव च ॥२॥ स्त्री निषेधे शतं

दद्याद्विशतं तु दमं पुमान् । प्रतिषेधे तयोर्दंडो यथा संग्रहणे तथा ॥३॥ स्वजातावुत्तमो दंड आ

नुलोम्ये तु मध्यमः । प्रतिलोम्ये वधः पुंसो नार्याः कर्णादिकर्तनं ॥४॥ अलंकृतां हरन्क

Indira Gandhi National Centre for the Arts

न्यामुत्तमं चान्यथाधमः। वर्णं च दासवर्णासु प्रातिलोम्येवधः सदा स्मृतः॥५॥ सकामास्वानुलो
मासु न दोषोस्त्वन्यथाधमः॥ दूषणोतु करच्छेद उत्तमायां वधस्तुवा॥६॥ शतं स्त्री दूषणो दद्या
द्वेतु मिथ्याभिशंसने। पशून् गच्छन् शतं दाप्यो हीनां स्त्रीं गोच मध्यमः॥७॥ अवरुद्धासु दा
सीषु भुजिष्यासु तथैव च। गम्यास्वपि पुमान् दाप्यः पंचाशदनिर्वादमः॥८॥ प्रसह्य दास्या
भिगमे दण्डो दश पणाः स्मृतः। बहूनां यद्यकामासौ चतुर्विंशतिकः पृथक्॥९॥ गृहीत वेत
ना वेश्याने च्छन्ती द्विगुणं वहेतु। अगृहीते समं दद्यात् पुमान् दीवमेव तु॥१०॥ अयोनौ गच्छतो
योषां पुरुषं वापि मेहतः। चतुर्विंशतिको दण्डस्तथा प्रव्रजितागमे॥११॥ अन्त्याभिगमने त्वंकाः
[illegible] प्रकर्षं गाभिमेहतः॥

५३

कर्णं पञ्च प्रवासयेत्। शूद्रस्तथान्त्य एव स्यादन्त्यस्यार्यागमे वधः॥ इति स्त्रीसंग्रहप्रकरणम्॥ ऊनं वा
प्यधिकं वापि लिखेद्यो राजशासनम्। पारदारिकचौरं वा मुञ्चतो दण्ड उत्तमः॥१॥ अभक्ष्येण द्विजं
दूष्यो दण्ड्य उत्तमसाहसं। मध्यमं क्षत्रियं वैश्यं प्रथमं शूद्रमर्द्धिकं॥२॥ कूटस्वर्णव्यवहारी वि
कर्मांसस्य विक्रयी। अंगहीनास्तु कर्तव्या दाप्याश्चोत्तमसाहसं॥३॥ चतुष्पादकृतादोषानापे
हीति प्रजल्पतः। काष्ठलोष्ठेषु पाषाणबाहुयुग्यकृतस्तथा॥४॥ छिन्ननस्येन यानेन तथा भग्नयु
गादिना॥ पश्चाच्चैवोपसरता हिंसने स्वाम्यदोषभाक्॥५॥ शक्तोप्यमोक्षयन् स्वामी दंष्ट्रिणां शृंगि
णां तथा। प्रथमं साहसं दद्याद्विक्रुष्टे द्विगुणं तथा॥६॥ जारं चौरेत्यभिवदन् दाप्यः पंचशतं तथा दमं

Indira Gandhi National Centre for the Arts

(४२

वाधन्नं मुच्यते देवा ब्रह्मशरीकृतः ॥७॥ राज्ञो मद्यप्रवक्तारं तस्यैव कोशकारिणं। तन्मात्रस्य वेन्नारं
छित्वा जिह्वां प्रवासयेत् ॥८॥ मृतांगलग्नविक्रेतुः गुरोस्ताडयितुस्तथा। राजयानासनारोढु
रुत्तमसाहसः ॥९॥ अमात्यमुत्यर्थ पापं पूर्वं साधयेत्याचवीपातः। राज्ञान्यायेन दंडो गृहीतवरु
णायतं। निवेद्य दद्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतं॥ राजा स्वघृतदंडास्तु कृत्वा पापानि मान ५४
वाः। निर्मलाः स्वर्गमायांति संतः सुकृतिनो यथा ॥९॥ शतं शतानि कर्तव्यं पत्नीनां तस्यानि
र्दिशेत् ॥१०॥ द्विने च नेदिने राजद्विड्ढादेशकृतस्तथा॥ विप्रत्वेन च शुद्रस्य जीवितो ब्रह्मशतोद
मः ॥११॥ दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान्नृपेण तु। सभ्यासं यामिनो वध्या विवादाद्द्विगुणोदमं ॥१२॥

राज्ञान्यायेन दंडो गृहीतवरुणायतं। निवेद्य दद्याद्विप्रेभ्यस्वयं त्रिंशद्गुणीकृतं ॥१४॥ राज्ञान्याये
नदंडो गृहीतवरुणायतं। निवेद्य दद्याद्विप्रेभ्यः स्वयं त्रिशद्गुणाकृतं। राजानिघृतदंडास्तु
कृत्वा पापानि मानवाः। निर्मलाः स्वर्गमायांति संतः सुकृतिनो यथा ॥१५॥ एवमुद्धृतदंडा
नां विबुधैकृतकर्मणां। स्वधर्मस्थापनाद्राजा प्रेत्यो मृतमश्नुते ॥१६॥ अत्र दंडविधिर्नोक्तः
सर्वेषां च महात्मनां। देशकालादि संचिंत्य तत्र दंडो विधीयते ॥ इति प्रकीर्णप्रकरणं॥ गांधी
कः। २०॥ इति आचारव्यवहारनीति धर्मशास्त्रे व्यवहाराध्याये नामा द्वादशोध्यायः समाप्तः ६ ॥ इति राज्ञा। वाल्मीकिस्मृति॥ शंख॥
ऊन द्विवर्षं निधने न कुर्यादुदकं ततः। आश्मशानादनुव्रज्य

॥१॥ यमसूक्तं तथा गाथा जपद्भिर्लौकिकाग्निना॥ स दग्धव्य उपेतश्चेदाहिताग्न्यावृतार्थवि-
त्॥२॥ सप्तमाद्दशमाद्वापि ज्ञातयोभ्युपयन्त्यपः। अप नः शोशुचदघमनेन पितृदिङ्मुखाः॥
३॥ एवं मातामहाचार्यप्रेतानामुदकक्रिया। कामोदकं सखिप्रत्तास्वस्रीयश्वशुरर्त्विजां॥
४॥ सकृत्प्रसिंचंत्युदकं नामगोत्रेण वाग्यताः॥ न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा
॥५॥ एतद्दत्त्वा विधानेन सर्वैरेव महात्मभिः। देशकालादि सापेक्ष्य ततश्चेदं विधीयते॥
॥६॥ पाषंडनाश्रिताः स्तेना भर्तृघ्न्यः कामगादिकाः॥ सुराप्य आत्मत्यागिन्यो नाशौचो-
दकभाजनाः॥७॥ कृतोदकान् समुत्तीर्णान् मृदुशाद्वलसंस्थितान्। स्नातानपवदेयुस्तानि- 55
तिहासैः पुरातनैः॥८॥ मानुष्ये कदलीस्तंभनिःसारे सारमार्गणं। यः करोति स संमूढो जल-
बुद्बुदसंनिभे॥९॥ पंचधा संभृतः कायो यदि पंचत्वमागतः। कर्मभिः स्वशरीरोत्थैः
तत्र का परिदेवना॥१०॥ गंत्री वसुमती नाशमुदधिर्दैवतानि च। फेनप्रख्यः कथं नाशं मृत्यु-
लोको न यास्यति॥११॥ श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुंक्ते यतोवशः। अतो न रोदितव्यं हि क्रि-
याः कार्याः स्वशक्तितः॥१२॥ इति संश्रुत्य गच्छेयुः गृहं बालपुरःसराः। विदश्य निंबपत्रा-
णि नियता द्वारि वेश्मनः॥१३॥ आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान्॥ प्रविशे-
युः समालभ्य कृत्वाश्मनि पदं शनैः॥१४॥ प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपि। इच्छतां

Indira Gandhi National Centre for the Arts

(४२)

तच्छरात्कुद्विः पदेषां स्नानसंयमात॥१५॥ आचार्यपितृपाध्यायान्निहृत्यापि व्रती व्रती॥ संकटा
न्नं न चाश्नीयान्न च तैः सह संविशेत्॥१६॥ क्रीतलब्धाशना भूमौ। स्वपेयुस्ते पृथक् क्षितौ।
पिंडयज्ञावृता देयं प्रेतायान्नं दिनत्रयं॥१७॥ जलमेकाहमाकाशे स्थाप्यं क्षीरं च मृन्मये
। वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनात्॥१८॥ त्रिरात्रं दशरात्रं वा शावमाशौच ५६
मिष्यते। ऊनद्विवर्षे उभयोः सूतकं मातुरेव हि॥१९॥ पित्रोस्तु सूतकं मातुस्तदसृ
ग्दर्शनाद्ध्रुवं। तदहर्न प्रदुष्येत पूर्वेषां जन्मकारणात्॥२०॥ अंतरा जन्ममरणे शे
षाहो... विशुध्यति॥ गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणं॥२१॥ हतानां

नृपगोविप्रैरन्वक्षं चात्मघातिनां। प्रोषिते कालशेषः स्यात्पूर्णे दत्त्वोदकं शुचिः॥२२॥ क्ष
त्रस्य द्वादशाहानि विशः पंचदशैव तु। त्रिंशद्दिनानि शूद्रस्य तदर्द्धं न्यायवर्त्तिनः॥२३॥
आदंतजननात्सद्यः आचूडान्नैशिकी स्मृता। त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परं॥२४॥
अहः स्वदत्तकन्यासु बालेषु च विशोधनं। गुर्वंतेवास्यनूचानमातुलश्रोत्रियेषु च॥२५॥
अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च। निवासराजनि प्रेते तदहः शुद्धिकारणं॥२६॥
ब्राह्मणेनानुगंतव्यो न शूद्रो न द्विजः क्वचित्। अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक्
शुचिः॥२७॥ महीपतीनां नाशौचं हतानां विद्युता तथा। गोब्राह्मणार्थे संग्रामे यस्य चेच्छ

Indira Gandhi National
Centre for the Arts

(४३)

तिनूमितः॥२७॥ सविनूमियः॥२८॥ सान्वजदीक्षितानां च यज्ञियं कर्म कुर्वतां ॥ सत्रिव्रतिब्रह्म
चारिदातृब्रह्मविदां तथा ॥२९॥ दाने विवाहे यज्ञे च संग्रामे देशविप्लवे। आपद्यपि च कष्टायां
सद्यः शौचं विधीयते ॥३०॥ उदक्या शुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत्। अब्लिं
गानि जपेच्चैव सावित्रीं मनसा सकृत् ॥३१॥ कालोग्निः कर्म मृद्वायुर्मनो ज्ञानं तपो जलं। पश्चा ५८
त्तापो निराहारः सर्वेऽमी शुद्धिहेतवः ॥३२॥ अकार्यकारिणां दानं वेगो नद्याश्च शुद्धि ५१
कृत्। शोध्यस्य मृच्च तोयं च संन्यासो वै द्विजन्मनां ॥३३॥ तपो वेदविदां क्षांतिर्विदुषां
वर्ष्मणो जलं। जपः प्रच्छन्नपापानां मनसः सत्यमुच्यते ॥३४॥ भूतात्मनस्तपोवि

द्ये बुद्धेर्ज्ञानं विशोधनं। क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता ॥३५॥ इत्याशौचप्र
करणं॥ क्षात्रेण कर्मणा जीवेद्विशां वाप्यापदि द्विजः। निस्तीर्य तामथात्मानं पावयित्वा
न्यसेत्पथि ॥१॥ फलोपलक्षौमसोममनुष्यापूपवीरुधः॥ तिलौदनरसक्षारान्दधि
क्षीरं घृतं जलं ॥२॥ शस्त्रासवमधूच्छिष्टमधुलाक्षा च बर्हिषः॥ मृच्चर्मपुष्पकुतपकेश
तक्रविषक्षितीः ॥३॥ कौशेयनीललवणमांसैकशफसीसकान्। शाकार्द्रौषधिपिण्या
कपशुगंधांस्तथैव च ॥४॥ वैश्यवृत्यापि जीवन्नो विक्रीणीत कदाचन। धर्मार्थं विक्रयं नेया
स्तिला धान्येन तत्समाः ॥५॥ लाक्षालवणमांसानि पतनीयानि विक्रये। पयो दधि

Indira Gandhi National
Centre for the Arts

(४९

तथा मद्यं ह्नि न वर्जाकरा तातु ॥ ३॥ आपद्गतः संप्रगृह्णन् भुंजानो यतस्ततः। न लिप्ये नसा विप्रो ज्वलनार्कसमो हि सः ॥३॥ कृषि। शिल्पं भृति र्विद्या कुसीदं शकटं। गिरिः। सेवानूपं नृपो भैक्षमापत्तौ जीवनानि तु ॥४॥ बुभुक्षितस्त्र्यहं स्थित्वा धान्यमब्राह्मणा द्धरेत्। प्रतिगृह्य तदाख्येयमभियुक्तेन धर्मतः ॥५॥ तस्य वृत्तं कुलं शीलं श्रुत ५७

मध्ययनं तपः। ज्ञात्वा राजा कुटुंबं च धर्म्यं वृत्तिं प्रकल्पयेत् ॥१०॥ इत्यापद्धर्म ५८

प्रकरणं ॥ ॐ ॥ सुतविन्यस्तपत्नीकस्तया वानुगतो वनं। वानप्रस्थो ब्रह्मचा

सा। ग्निः सोपानसो व्रजेत् ॥१॥ अफालकृष्टेनाग्नींश्च पितॄन्देवातिथीन पि। भृत्यां

श्च तर्पयेत् श्मश्रुजटालोमभृदात्मवान् ॥२॥ अह्नो मासस्य षण्णां वा तथा संवत्सरस्य च।

अर्थस्य संचयं कुर्यात् कृतमाश्वयुजे त्यजेत् ॥३॥ दांत। स्त्रिषवणस्नायी। निवृत्तश्च

प्रतिग्रहात्। दं स्वाध्यायवान्दानशीलः सर्वसत्वहिते रतः ॥४॥ दंतोलूखलिकः

कालः पक्वाशी वाश्मकुट्टकः। श्रौतं स्मार्तं फलस्नेहैः कर्म कुर्यात् क्रियास्तथा ॥५॥

चांद्रायणैर्नयेत्कालं कृच्छ्रैर्वा वर्तयेत्सदा। पक्षे गते वाप्यश्नीयान्मासे वाह्नि वा गते

॥६॥ स्वप्याद्भूमौ शुची रात्रौ। दिवा संप्रपदैर्नयेत्। स्थानासनविहारैर्वा योगाभ्यासे

न वा तथा ॥७॥ ग्रीष्मे पंचा। ग्निमध्यस्थो वर्षासु स्थंडिलेशयः। आर्द्रवासोस्तु हेमंते श

Indira Gandhi National
Centre for the Arts

५८

कुर्यादापत्सु तपश्चरेत्॥ यः कंटकैर्वितुदति चंदनैर्यश्च लिंपति। अक्रुद्धोऽपरितुष्टश्च सम
स्तस्य च तस्य च॥४९॥ अग्नीन्वाप्यात्मसात्कृत्वा वृक्षावासो मिताशनः। वानप्रस्थगृहे
ष्वेव यात्रार्थं भैक्षमाचरेत्॥५०॥ ग्रामादाहृत्य वा ग्रासानष्टौ भुंजीत वाग्यतः। वायु
भक्षः प्रागुदीचीं गच्छेद्वाऽवर्ष्मसंक्षयात्॥ इति वानप्रस्थप्रकरणं॥ वनाद्गृहाद्वा ५८
कृत्वेष्टिं सार्ववेदसदक्षिणां॥ प्राजापत्यां तदंते तानग्नीनारोप्य चात्मनि॥१॥ ५८
अधीतवेदो जपकृत्पुत्रवानन्नदोऽग्निमान्॥ शक्त्या च यज्ञकृन्मोक्षे मनः कु
र्यात्तु नान्यथा॥२॥ सर्वभूतहितः शांतस्त्रिदंडी सकमंडलुः॥ एकारामः परिव्रज्य

भिक्षार्थी ग्राममाविशेत्॥३॥ अप्रमत्तश्चरेद्भैक्षं सायाह्नेऽनभिलक्षितः। रहिते भिक्षुकै
र्ग्रामे यात्रामात्रमलोलुपः॥४॥ यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च। सलिलैः शुद्धिरेते
षां गोवालैश्चावघर्षणं॥५॥ सन्निरुध्येंद्रियग्रामं रागद्वेषौ प्रहाय च। भयं हित्वा च भूतानां
ममृतीभवति द्विजः॥६॥ कर्तव्याशयशुद्धिस्तु भिक्षुकेण विशेषतः। ज्ञानोत्पत्तिनिमित्तत्वात्
स्वातंत्र्यकरणाय च॥७॥ अवेक्ष्या गर्भवासाश्च कर्मजा गतयस्तथा॥ आधयो व्याधयः क्लेशा ज
रारूपविपर्ययः॥८॥ ध्यानयोगेन संपश्येत्सूक्ष्म आत्मात्मनि स्थितः। नाश्रमः कारणं धर्मे क्रि
यमाणो भवेद्धि सः॥९॥ सत्यमस्तेयमक्रोधः ह्रीः शौचं धीर्धृतिर्दमः। संयतेंद्रियता विद्या
धर्मः सर्व उदाहृतः॥१०॥ निःसरंति यथा लोहपिंडात्तप्तात्स्फुलिंगकाः। सकाशादात्मनस्तद्वद

Indira Gandhi National Centre for the Arts

नः प्रभवंति हि ॥११॥ न चात्मा हि स्वयं कांचित् कर्म्मा किंचि स्वभावतः। करोति किंचिदभ्यासात् धर्म्मो
धर्म्मा न यात्मकः ॥१२॥ निमित्तमक्षरः कर्त्ता बोद्धा सर्व्व गुणी वसी। अजः शरीरग्रहणात् स जात
इति कीर्त्यते ॥१३॥ सर्गादौ स यथाकाशं वायुं ज्योति जलं मही॥ सृजत्येकोत्तरगुणां तथादात्त
न वन्नपि ॥१४॥ आहुत्याप्यायते सूर्य्यः सूर्याद्वृष्टिरथौषधीः। तदन्नं रसरूपेण शुक्रत्वमुप
गच्छति ॥१५॥ स्त्रीपुंसयोस्तु संयोगे विशुद्धे शुक्रशोणिते। पंचधातुन स्वयं षष्ठ आदत्ते युगप
त्प्रभु ॥१६॥ इंद्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः। धारणा प्रेरणां दुःखमिच्छाहंकार
एव च ॥१७॥ प्रयत्न आकृतिर्वर्णः स्वरद्वेषौ भवाभवौ। तस्येदमात्मजं सर्वं मनादेरादि। मिच्छतः
॥१९॥ प्रथमे मासि संक्लेदभूतो धातुविमूर्च्छितः। मास्यर्बुदं द्वितीये तु तृतीयेंद्रियैर्युतैः ॥२०
॥ आकाशाल्लाघवं सौक्ष्म्यं शब्दं श्रोत्रं बलादिकं। वायोश्च स्पर्शनं चेष्टा व्यूहनं रौक्ष्यमेव च ॥२१॥ पि

त्तात्तु दर्शनं पक्तिमौष्ण्यं रूपं प्रकाशतां। रसात्तु रसनं शैत्यं स्नेहं क्लेदं समार्दवं ॥२२॥ भूमेर्गंधं
तथाघ्राणं हतस्मात्प्रदानेन गर्भोदितमवाप्नुयात्॥ वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः
॥२४॥ स्थैर्यं चतुर्थे त्वंगानां पंचमे शोणितोद्भवः। षष्ठे बलस्य वर्णस्य नखरोम्णां च संभवः॥
२५॥ मनश्चैतन्ययुक्तोसौ नाडीस्नायुः शिरायुतः। सप्तमे चाष्टमे चैव त्वग्मांसस्मृतिमानपि ॥२६॥
पुनर्धात्रीं पुनर्गर्भं ओजस्तत्र प्रधावति। अष्टमे मास्य जातो न जातः प्राणैर्वियुज्यते ॥२७॥ नवमे दशमे वा
पि प्रबलैः सूतिमारुतैः। निःसार्यते बाण इव यंत्रच्छिद्रेण सज्वरः ॥२८॥ तस्य षोढा शरीराणि षट्
त्वचो धारयंति च। षडंगानि तथास्थ्नां च सह षष्ट्या शतत्रयं ॥२९॥ स्थालैः सह चतुःषष्टिर्दंता वै विंशतिर्नखाः।
पाणिपादशलाकाश्च। तासां स्थानचतुष्टयं ॥३०॥ षष्ट्यंगुलीनां द्वे पार्ष्ण्योर्गुल्फेषु च चतुष्टयं। चत्वा

Indira Gandhi National Centre for the Arts

(५०)

...कास्थीनि जंघयोस्तावदेव तु ॥२१॥ द्वे द्वे जानुकपोलोरु...कांसमुद्भवेत् । अक्षतालूषकश्रोणी
...केच विनिर्दिशेत् ॥२२॥ भगास्थ्येकं तथा पृष्ठे चत्वारिंशत्सुदीर्घ च । ग्रीवा पंचदशास्थिः स्याज्जत्र्वेकैकं
तथा हनुः ॥२३॥ तन्मूले द्वे ललाटाक्षौ कपाला । नवचाविंशत्सस्तथा । उरः सप्तदशास्थीनि पुरुष
...॥२४॥ द्विगतेनाघनास्थिताः । पाश्र्वकाः स्थालकैः सार्द्धमर्बुदैश्च द्विसप्तति ॥२४॥
स्यास्थिसंग्रहः ॥२४॥ द्विगतेनाघनास्थिताः । उरः सप्तदशास्थीनि पुरुषस्यास्थिसंग्रहः ॥२५॥ ग्री
द्वौ शंखकौ कपाला नवचाविंशत्सस्तथा ॥ नासिकालोचने जिह्वा त्वक् श्रोत्रं च । इन्द्रियाणि च ॥२६॥ हस्तौ
षट्कूपवसस्य शीर्षावृषविषयास्मृताः । नासिकालोचने जिह्वा त्वक् श्रोत्रं च । इन्द्रियाणि च ॥ हस्तौ
पायूपस्थं तथा वाक् च ... पंचकर्मेन्द्रियाणि तु । ...कुंदरौ ॥४१॥ वक्षोयोवृषणौ वृक्कौ श्लेष्मसंघात
नौ वक्षी जत्रुकौ । कर्णौ शंखौ भ्रुवौ दन्ता वेष्टौ विद्योक कुंदरौ ॥४२॥ तालु उदरं वस्तिशीर्षं चिबुकं गलशुण्डिका
...ज्ञो ॥ उपजिह्वा स्पृगोबाद्गूं जं घोक स्तुचपिटकाः

। पूर्वं ज्ञानं कथं तुनः । वेत्ति सर्वगतं कस्मात्सर्वगो पिनवेदना ॥७५॥ अत्यपक्षिष्ठावरता मनोवाक्
तकर्मजैः । दोषैः प्रयाति जीवोयं भवयोनिशतेषु च ॥७६॥ अनंतास्तु यथा भावाः शरीरेषु शरीरि
णां । रूपाण्यपि तथैवेह सर्वयोनिषु देहिनां ॥७७॥ विपाकः कर्मणां प्रेत्य केषांचिदिह जायते । इह
वामुत्रवैकेषां भावस्तत्र प्रयोजकः ॥७८॥ परद्रव्याण्यभिध्यायं तथानिष्टानि चिंतयन् । वितथा
भिनिवेशी च जायतेंत्यासु योनिषु ॥७९॥ पुरुषोनृतवादी च पिशुनः परुषस्तथा । अनिबद्धप्रला
पी च मृगपक्षिषु जायते ॥८०॥ अदत्तादाननिरतः परदारोपसेवकः । हिंसकश्चाविधानेन स्थावरे
ष्वभिजायते ॥८१॥ आत्मवान् शौचवान् दांतः तपस्वी विजितेंद्रियः । धर्मकृद्वेदविद्याविसात्त्विको देव
योनितां ॥८२॥ असत्कार्यरतोधीर आरंभी विषयी च यः । सराजसोमनुष्येषु मृतो जन्माधिगच्छति ॥८३॥
योनितां ॥८२॥ असत्कार्यरतोधीर आरंभी विषयी च यः

निद्रालुः क्रूरकः क्षुब्धो नास्तिको याचकस्तथा ॥ प्रमादवानभिन्नवृत्तो भवेत्तिर्यक्तु तामसः ॥८४ ॥
रजसा तमसा चैव समाविष्टो भ्रमन्निह । भावैरनिष्टैः संयुक्तः संसारं प्रतिपद्यते ॥८५॥ मलिनो
हि यथादर्शो रूपालोकस्य न क्षमः । तथा विपक्वकरण आत्मज्ञानस्य न क्षमः ॥८६॥ कटुकि
तौ यथा पक्वे मधुरं सन्न रसो भवेत् । प्राप्यते ह्यात्मनि तथा नापक्वकरणे ज्ञता ॥८७॥ सर्वश्चयानि ६४
अवेद्ये हेतेर्दे लिङ्गानि वेदना । योमुक्तस्तत्सर्वकर्मयोगेन वाप्नोति वेदना ॥८८॥ आकाशमिव हृदय
वायवश्च दिक्षु पृथक् भवेत् । तथात्मनाद्यैरनेकश्च जगत्यविच्छिन्न स्थितः ॥८९॥ बहुरूपा
वायवश्च दिक्षु पृथक् ... ॥९०॥ मृदङ्ग
दिव्यतिजो जलनृत्यति आतवः । इमे लोकाः समस्ताश्च तस्मात्तु सर्वं सत्त्ववत् ॥९१॥ हेममात्रमु
... योगात् कुण्डलकादिवत् । करोति तथा मृत्कार्ये घटकुम्भादिकारकः ॥ ९२

पदार्थाय रूपवान् रूपकारकः । निजमाया समायोगात् कोशकारकः । करणाम्नोनमायावत्ता
सुता स्थिरत्वोऽभिमुख । जनन्या अम्बमाम्बा च सञ्जूयकरणाभ्रिच ॥९३॥ महाभूतानि सत्ता नियथात्मा
पितवैवाहि । कोन्यथैकेन नरत्तेरा दृढ़मानान पश्यति ॥९४॥ वासवाको विभालाति पुत्रः संस्तुत्य
संश्रुताः । अतीतार्थी स्मृतिः कस्य कोवास्य पुरस्कारकः ॥९५॥ ज्ञातिरूपवतो ह्रात्वा विद्या दिनवर
संश्रुताः । सत्त्वः सत्त्वादि विषयकर्मणा मनसा गिरा ॥९६॥ संसार गुह्यमतिः कर्मफलमाप्नुवन्निति
इकृतः । स सत्त्वः सद्वस्तु आत्मनमासिद्धो विद्धि मनस्यति ॥९७॥ ममदारा सुता माता सोऽहं साक्षात्मति स्थित
वा विप्लुतः । सद्विमात्मनमासिद्धो विपरीतमतिः सदा ॥९८॥ इयत्तुः प्रकृतौ चैव विकारे चाविशेषवान् । अनात्म
: हिताहितेषु नाविषु विपरीतमतिः सदा ॥९९॥ एवं वृत्तो विनीतात्मा वितथाभिनिवेशवान् । कर्मण्याद्वैवमा
कानतातानजगत्प्रयतोनोचमी ॥१००॥

(५२)

शाश्वद्बुद्ध्याचैव वर्धयात् ॥१००॥ आचार्योपासनं वेदशास्त्रार्थेषु विवेकता। सत्कर्म्मणामनुष्ठानं सङ्गः साधुभि
रः शुभः ॥१॥ स्त्र्यालोकालम्भविगमः सर्वभूतात्मदर्शनं। त्यागः परिग्रहाणां च जीर्णकाषायधारणं।
॥२॥ विषयेन्द्रियसंरोधस्तन्द्रालस्यविवर्जनं। शरीरपरिसंख्यानं प्रवृत्तिष्वघदर्शनं ॥३॥ नीरजस्तमता
सत्त्वशुद्धिर्निस्पृहता शमः। एतैरुपायैः संशुद्धः सत्त्वयोग्यमृती भवेत् ॥४॥ सत्त्वस्मृतैकरूपस्याजा
तसत्त्वयोगात्य हि ध्रुवात्। कर्म्मणां संनिकर्षाच्च सतां योगः प्रवर्त्तते ॥५॥ शरीरसंक्षयो यस्य मनः
सत्त्वस्थमीश्वरं। अविप्लुतमतिः सम्यक् स जातिस्मरतामियात् ॥६॥ यथा हि भरतो वर्णैर्वर्त्तयत्या
त्मनस्तनुं। नानारूपाणि कुर्वाणस्तथात्मा कर्मजास्तनूः ॥७॥ कालकर्म्मात्मबीजानां दोषैर्म ८५

इष्टुनरेवव्रजन्ति च ॥४१॥ एतद्योन विजानाति मार्गद्वितयमात्मवान्। दंदशूकः पतंगो वा भवेत्कीटो
ऽथवा कृमिः ॥४२॥ उरस्थोत्तानचरणः सव्ये न्यस्येतरं करं। उत्तानं किञ्चिदुन्नाम्य मुखं विष्टभ्य
चोरसा ॥४३॥ निमीलिताक्षः सत्त्वस्थो दन्तैर्दन्तानसंस्पृशन्। तालुस्थाचलजिह्वश्च संवृतास्यः
सुनिश्चलः ॥४४॥ संनिरुध्येन्द्रियग्रामं नातिनीचोच्छ्रितासनः। द्विगुणं त्रिगुणं वापि प्राणायाम
मुपाक्रमेत ॥४५॥ ततो ध्येयः स्थितो योऽसौ हृदये दीपवत्प्रभुः। धारयेत्तत्र चात्मानं धारणां धारय
न्बुधः ॥४६॥ अन्तर्धानं स्मृतिः कान्तिर्दृष्टिः श्रोत्रज्ञता तथा। निजं शरीरमुत्सृज्य परकायप्रवे
शनं ॥४७॥ अर्थानां छन्दतः सृष्टिर्योगसिद्धेस्तु लक्षणं। सिद्धे योगे त्यजन्देहममृतत्वाय कल्प
ते ॥४८॥ अथवाप्यभ्यसन्वेदं न्यस्तकर्मा वने वसन्। अयाचिताशी मितभुक् परां सिद्धिम

Indira Gandhi National Centre for the Arts

वापुयात्॥४९॥ न्यायार्जितधनस्त्वं ज्ञानविज्ञो तिथिप्रियः॥ श्राद्धकृत्सत्यवादी च गृहस्थोपि
हि मुच्यते॥५०॥ इत्य... करा... महापातकजान् घोरान् नरकान् प्राप्य दारुणा
न्॥ कर्म... जायंते महापातकिनास्त्विह॥१॥ मृगस्य शूकरस्यापि ब्रह्महा योनिमृच्छ
ति। खरपुल्कस धेनानां सुरापो नाविशेत्सदा॥२॥ कीटपतंगत्वं स्वर्णहारी
माप्नुयात्। तृणगुल्मलतानां च क्रमशो गुरुतल्पगः॥३॥ ब्रह्महा क्षयरोगी स्यात् ६८
सुरापः श्यावदंतकः॥ हेमहारी तु कुनखी दुश्चर्मा गुरुतल्पगः॥४॥ योयेन संवसत्येषां स तल्लिं
गो भिजायते। प्रायश्चित्तं प्रकर्तव्यमस्मात्... परस्मृतं॥५॥ ...हंतौ मित्रावासयोन्मू
घातं लोहितौ दक्षसावेषं संप्रतापनं। महानरककाकोलं संजीवनमहापथं॥२०॥ अवीचीम
धतामिस्रं कुंभीपाकं तथैव च। असिपत्रवनं चैव तापनं चैकविंशकं॥२१॥ महापातकिनो दीर्घ
कम्प पातकजेस्तथा। आन्विता यांति चावीनि किल स्वैः तैः पञ्चतैः सह संवसेत्॥२२॥ गुरूणाम
ध्याक्षे दोषो वेदनिंदा सुहृद्वधः। ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनं॥२४॥ निषिद्धभक्षणं
जैह्म्यमुत्कर्षे च वचोनृतं। रजस्वलामुखास्वादः सुरापानसमानि तु॥ अश्वरत्नमनुष्यस्त्रीभू
धेनुहरणं तथा। निक्षेपस्य च सर्वं हि सुवर्णस्तेयसंमितं॥२६॥ सखिभार्याकुमारीषु स्वयो
निष्वंत्यजासु च। सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतं॥२७॥ पितुः स्वसारं मातुश्च मातु

Indira Gandhi National
Centre for the Arts

(१२४)

योनीस्नुषामपि। मातुः सपत्नीं भगिनीमाचार्यतनयां तथा ॥२८॥ आचार्यपत्नीं तनयां गच्छंस्तु
गुरुतल्पगः। लिंगं छित्वा वधस्तस्य सकामां स्त्रियामपि॥२९॥ गोवधो व्रात्यता स्तेयमृणा
चापनाक्रिया। अनाहिताग्नितापण्यविक्रयः परिवेदनं॥३०॥ भृताद्ध्यायनादानं भृतका
ध्यापनं तथा॥ पारदार्यं पारिवित्यं वार्धुष्यं लवणक्रिया॥३१॥ स्त्रीशूद्रविट्क्षत्रवधो निंद
तार्थोपजीवनं। नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः॥३२॥ धान्यकुप्यपशुस्तेय
मयाज्यानां च याजनं। पितृमातृसुतत्यागस्तडागारामविक्रयः॥३३॥ कन्यासंदूषणं चैव प १०
रिविंदकयाजनं। कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनं॥३४॥ आत्मनोर्थे क्रियार

म्भो मद्यपस्त्रीनिषेवणं। स्वाध्यायाग्निसुतत्यागो बांधवत्याग एव च॥३५॥ इंधनार्थं द्रुमच्छेद
ः स्त्रीहिंस्त्रौषधिजीवनं। हिंस्रयंत्रविधानं च व्यसनान्यात्मविक्रयः॥३६॥ शूद्रप्रेष्यं हीनस
ख्यं हीनयोनिनिसेवनं। तथैवानाश्रमेवासः परान्नपरिपुष्टता॥३७॥ असच्छास्त्राधिगमनमा
करेष्वधिकारिता॥ भार्याया विक्रयश्चैवमेकैकमुपपातकं॥३८॥ शिरःकपाली ध्वजवान्
भिक्षाशी कर्म वेदयन्॥ ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात॥३९॥ ब्राह्मणस्य परित्रा
णाद्गवां द्वादशकस्य वा। तथाश्वमेधावभृथस्नानाद्वा शुद्धिमाप्नुयात्॥४०॥ दीर्घतीव्रामयग्र
स्तं ब्राह्मणं गामथापि वा। दृष्ट्वा पथि निरातंकं कृत्वा वा ब्रह्महा शुचिः॥४१॥ आनीय विप्रसर्व

Indira Gandhi National Centre for the Arts

(५५)

स्वं हतं घातित एव वा । तन्निमित्तं कृतः शस्त्रैर्जीवन्नपि विशुध्यति ॥४२॥ लोमभ्यः स्वाहेत्येवं हि-
लोमप्रभृति वै तनुं । मज्जांतां जुहुयाद्वापि मंत्रैरेतैर्यथाक्रमं ॥४३॥ संग्रामे वा हतो ल-
क्ष्यस्ततः शुद्धिमवाप्नुयात् । मृतकल्पः प्रहारार्त्तो जीवन्नपि विशुध्यति ॥४४॥ अरण्ये नियतो
जप्त्वा त्रिः कृत्वा वेद संहितां । शुध्येत वा मिताशी तु प्रति स्रोतः सरस्वतीं ॥४५॥ पात्रे धनं ७१
वा पर्याप्तं दत्वा वा शुद्धिमाप्नुयात् । आदातुश्च विशुद्ध्यर्थमिष्टिर्वैश्वानरी स्मृता ॥४६॥ यागस्थ-
क्षत्रविट्घाती चरेद्ब्रह्महणि व्रतं । गर्भहा च यथावर्णं तथात्रेयीनिषूदकः ॥४७॥ चरेद्व्रत-
महत्वापि घातार्थं चेत्समागतः ॥ द्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशेत् ॥४८॥ इति ब्रह्म-

हत्याप्रायश्चित्तप्रकरणं ॥ सुरांबुघृतगोमूत्रपयसामग्निसंनिभं । सुरापोऽन्यतमं पीत्वा मरणाच्छु-
द्धिमृच्छति ॥१॥ वालवासा जटी वापि ब्रह्महत्याव्रतं चरेत् । पिण्याकं वा कणान्वापि भक्षयेत्रिः समा
निशि ॥२॥ अज्ञानात्तु सुरां पीत्वा रेतो विण्मूत्रमेव च । पुनः संस्कारमर्हंति त्रयो वर्णा द्विजातयः ॥
३॥ पतिलोकं न सा याति ब्राह्मणी या सुरां पिबेत् । इहैव सा शुनी गृध्री शूकरी चोपजायते ॥४॥ इति
सुरापानप्रायश्चित्तं ॥ ब्राह्मणस्वर्णहारी तु राज्ञे मुशलमर्पयेत् । स्वकर्म ख्यापयंस्तेन हतो वि-
मुक्तोऽपि वा शुचिः ॥१॥ आत्मवेद्यानृपे शुध्येत्सुरापव्रतमाचरेत् । आत्मतुल्यं सुवर्णं वा दद्या-
द्वा विप्रतुष्टिकृत् ॥२॥ इति सुवर्णस्तेयप्रायश्चित्तप्रकरणं ॥ सुराम्बुघृतगोमूत्रपयसामग्निस-

Indira Gandhi National
Centre for the Arts

निनां॥ स्ववानप्रासः शवान सार्द्धं मायस्या यो बिना स्वपेत्। गृहीत्वो त्कन्य वृषयोनैर्स त्यां चोत्सृजे
त्ततु०॥१॥ प्राजापत्यं चरेत्कृच्छ्रं समाप्ता गुरुतल्पगः। चांद्रायणं वा त्रीन मासान अभ्यसेन्वेव संहि
ता॥२॥ इति गुरुतल्पग प्रायश्चित्त प्रकरणं॥ एतैस्तु संवसेद्यो वै वत्सरं सोपि तत्समः। क
न्यां समुद्वहेदेषां सोपवासामकिंचना॥१॥ चांद्रायणं चरेत्सर्वान्न च कृच्छ्रा॥ व्रत्यन्तु। शुद्धो त ७२
...वहीनो त्रिकालेनानेन शुद्ध्यति॥ इति महापातक प्रायश्चित्त प्रकरणं॥ पंचगव्यं पिबन् गोघ्नो
मासमासीत संयतः। गोष्ठेशयो गोनुगामी गोप्रदानेन शुद्ध्यति॥१॥ कृच्छ्रं चैवातिकृच्छ्रं च
चरेद्वापि समाहितः। दद्यात्त्रिरात्रं चापोष्य वृषभैकादशास्तु गाः॥२॥ उपपातक शुद्धिः स्यादे

...नवा। वयसा वापि मासेन पाराकेणाथवा पुनः॥३॥ वृषभैकसहस्रा गौ दद्यात्क्षत्रवधे
...ड त्याव्रतं वा विवत्सरं चितयं चरेत्॥४॥ वैश्यहत्यां चरेदेतद्दद्याद्वैकशतं गवां। षण्मा
...पयदद्याद्धेनुर्दशापि वा॥५॥ दुर्वृत्ताब्रह्मविट्शूद्रयोषाः प्रमापयेत्॥ दृतिं चतुर्वस्तमवि
...त्वादिशुद्धये॥६॥ अप्रदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेत्। अस्थिमतां सहस्रं तु तथानस्थिम
...॥७॥ मार्जार गोधा नकुल मंडूक श्वानं द्विजाः॥ कृत्वा त्र्यहं पिबेत्क्षीरं कृच्छ्रं वा पादिकं चरेत्॥८
त्राणः पंच शुकेव स्वा द्विहायनाः। खराजमेषे वृषभो देयः क्रौंच विहायनः॥९॥ हंसश्ये
...जलस्थलशिखीजनः॥ मासहत्य उव ... शृंगवां॥ व्यासदद्यान्मक्रव्यादस्तु
॥१०॥ उवगोप्राप्य सोदः पंडकेज्जवुसीस ... । कोले घृतचटौ देयउ ... जादिशु

Indira Gandhi National Centre for the Arts

॥ ग्निर्वा तु तिलद्रोणं गजादीनामकुर्वतः। दानं दातुं चरेत्कृच्छ्रमेकैकस्य विशुद्धये ॥१२॥
।नवसंजसूत्यधाते चूतासनं ॥कि ।चन्द्रा। स्कन्द भेदर्षु पारं गायामस्कंन। स्कि के ॥१३॥
।गुल्मवीरुत्कं दानं जपा पृक्कशर्तं। स्यावेध वृथा दीवाशी गोतु गो दिमं ॥१४॥
ध्यान्नरजसंचयाते चूतासनः। पुंश्चलीवानरखरैर्दष्टः श्वोष्ट्रादिवायसैः ॥१५॥ प्रा
णं जले कृत्वा घृतं प्राश्य विशुद्ध्यति। यन्मयैवंत इत्यान्यां स्कन्नार तोन्निर्मन्त्रयेत ॥१६॥ १३
ते नुवोभि र्ध्यते ना। मिक्यां स्पृशेत॥ मासि तेजइतिच्छायां स्वां दृष्ट्वा भुमतां जपेत ॥१७॥ १२
।मशुचौ देशे चापल्ये चानृति पिब॥ श्वबकीयीन्नवेद्रच्या ब्रह्म च। रीति यो षिता ॥१८॥
पशुमालभ्य जैस्त्रि तं स विशुध्यति॥ नैष्ठिकाग्निकार्येत्यक्त्वा तु स पुत्रात्रं मनानुरः ॥१९॥

कामावकीर्णइत्या ग्निन्यां कृत्वा वापि वाज्याकृति द्वयं। उपस्थानं ततः कुर्यात् समासिंचत्व मिनत्तु ॥
२०॥ मधुमांसाशने कार्यः कृच्छ्रः शेषव्रतानि च। प्रतिकूलं गुरोः कृत्वा। प्रसाद्यैव विशुध्यति ॥२१॥
कृच्छ्रं चर्यं गुरुः कुर्यात् म्रियते प्रहितो यदि॥ अबुधान्न प्रदानाद्यैः स्नेहाद्यैवीपु पक्रमैः ॥२२॥
।क्रियमाणोपकारे तु मृते विप्रे न पातकं। विपाकर्मणो बाराविन्य जा ग्नि क आस्तुच ॥२३॥ मि
थ्या। अशक्तदोषं च समादद्वै मृषावत्। सिनोदोषी द्विः समोनृत वादिनः॥ मिथ्या शस्त्रवोर्ध
च समादद्वै मृषावत् ॥२४॥ महापापोपपापाभ्यां यो निशंसेन्मृषापरः। अजन्मो मासमासीत स
जापी नियतेन्द्रियः॥२५॥ अभिशस्तोमृषापरः। कृच्छ्रं चरेदाग्नेयमेव च। निर्वपेत पुरोडाशं वा
यव्यं पशुमेव च। अनिमुक्तोत्राद जातौ मन्वा चांत्रा यणं चरेत्। त्रिरात्रं तेघृतं प्राश्य गत्वो

Indira Gandhi National
Centre for the Arts

(५८)

दक्याशुचिर्भवेत् ॥२७॥ श्रीनकृच्छ्रानाचरेद्वा ययाजको ऽनिश्चरन्नपि । दिवछीयवाशपर्वं ५स्को ७४

चवरमागतं ॥२८॥ अवकृच्छ्रं । स्त्रियं गव्या शुद्धिस्याडायनेन तु । संस्पृश्य द्विवसश्चार्नं स्नानं

कृत्वाशुचिर्भवेत् ॥२९॥ ब्रह्मचारी वसन गोष्ठे मासमेकं पयोव्रतः । गायत्रीजाप्यनिरतो गु

च्यते सत्प्रतिग्रहात् ॥३०॥ प्राणायामी जपेत् स्नात्वा रुवयाजो ष्ठुयानगः ॥ ततः स्नात्वा

दनुश्चाचगत्या बेव दिवा स्त्रियं ॥३१॥ शुक्र उकृयक्कृत्याविप्रनिर्जित्यवादतः ॥ वध्वा

वावोससाद्विप्रप्रसाद्योपवसेद्दिनं ॥३२॥ विप्रवर्तोद्यमेकश्च स्वातिकृच्छ्रो विपाद्रुने ।

कृत्वातिकृच्छ्रे सृक्याने कृच्छ्रोऽयं ततः शोधिते ॥३३॥ इति प्रकीर्णप्रायश्चित्तप्रकरणं ॥ वेशं

[illegible] पः [illegible] नः ॥ प्रायश्चित्तप्रकल्पस्यायन्नचोत्तानिवानिकृतिः ॥१॥

[illegible] सारी [illegible] या [illegible] दातिचंयः । प्रायश्चित्तीनवेत्तुद्वः पापंपवि सर्वं [illegible] जेत ॥२॥

[illegible] मीतानि [illegible] युश्चबान्धवाः । पतितस्य वह्निः कुर्युः सर्वकार्येषु चैव तं ॥३॥ सवि

[illegible] । गुरुपोत्रुमचाप्यर्न्नं सवनेयुश्च सर्वशः ॥४॥ पतिताना [illegible] एव

[illegible] । वासो [illegible] तिकेद्देयमन्नं वासः सवकदा [illegible] ॥५॥ जीवा [illegible] पात

[illegible] जि स्त्रीताम्नेतान्यधवं ॥६॥ शरणागतबालस्त्री हिंसका [illegible]

[illegible] कृ [illegible] सह्डितानिमान् ॥७॥ चण्डपवार्जित [illegible] आस्फोटव

[illegible]

Indira Gandhi National Centre for the Arts

प्रदद्यात्तु गाः सो... सत्कृत्य द्विजसत्तमः ॥८॥ विख्यातदोषः कुर्वीत पर्षदोनु
षस्तु रहः प्रव्रतमाचरेत ॥९॥ त्रिरात्रोपोषितो जप्त्वा ... ब्रह्मा
... चपेय । स्वर्णी ॥१०॥ लोमभ्यः स्वाहेत्यथवा ... सं नाक
... चत्वारि अक्ताकृतीः ॥११॥ त्रिरात्रोपोषितो हुत्वा कुष्मा
... पीड्य कृच्छ्रं पीजले स्थितः ॥१२॥ सहस्रशीर्षाजापी मुच्य
... स्यात् पृथग्जनः पयास्वर्णी ॥१३॥ इति महापातकप्रा
... सर्वपापानुत्तमे । उपपातकानामनादि



Indira Gandhi National
Centre for the Arts